Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अर्हम् ।

श्रीजिनेश्वरप्रणीतागमानुसारिश्रीमत्तपोगच्छगगनदिनमणिश्रीदेवेन्द्रसूरिसूत्रितं

श्रीश्रेणिकचरित्रम् ।

(श्रीश्राद्धदिनकृत्यगतं)

... મહારાજના
... મુનિ દક્ષપ્રભવિજય
જ્ઞાન ભંડાર.

प्रकाशयित्री—श्रीमालवदेशान्तर्गतरत्नपुरीयश्रीऋषभदेवजी केशरीमलजीश्वेतांबरसंस्था

वीर संवत् २४६४.
विक्रम संवत् १९९४.

पण्यम्
रु. ०—६—०

क्राइस्टसन् १९३८.
प्रतयः २५०.

'फकीरचंद्र मगनलाल बदामी' इत्यनेन जैनविजयानंदमुद्रणालये सूर्यपुरे मुद्रितं ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

श्रीश्रेणिकचरित्रस्योपक्रमः

ननु न कश्चित्तथाविधो जैनोऽस्ति यः श्रीमन्महावीरचरणचंचरीकं क्षायिकसम्यग्दर्शनवन्तं श्रीश्रेणिकं न श्रवणपथ्यकार्षीत्, तस्य भाविन आद्यतीर्थेश्वरस्य चरित्रमिदमनेकविधधर्मशेमुषीसंपल्लतापल्लवनांबुदायमानवृत्तान्तपरिवृतं, यद्यप्यनेकेषु श्रीआवश्यकादिवाङ्मयेषु अनेकेषु च श्रीहेमचन्द्राचार्यादिपूर्वतनाचार्यरचितेषु श्रीवीरचरित्रेषु निष्टंकितमेव स्पष्टमेतदीयं चरित्रं, किन्तु संक्षिप्तरुचिसत्त्वसमुद्दिधीर्षाप्रत्यलं चरित्रमेतत् श्रीश्राद्धदिनकृत्यवृत्तौ विनिवेशितं श्रीसर्वज्ञशासनाविचलशुद्धतमपारंपर्यधारकश्रीमत्तपोगच्छविभूषणश्रीदेवेन्द्रसूरिभिरित्यवगम्य पृथगुन्मुद्रितमेतत्, विज्ञाय चैनद्यथार्थं मार्गावताराप्रभविष्णवो भवन्तु भव्या इति प्रार्थनापुरस्सरं समाप्यतेऽदः, कर्त्तारश्चेमे 'क्रमात् प्राप्ततपोभिख्ये' तिकर्मग्रन्थादिवचनतः तपोगच्छधुरीणतया प्रसिद्धतमा एव, नायकोऽपि स्ववृत्तान्तविहितजैनशासनयशःपूरः श्रीश्रेणिक इति न तयोरेकस्यापि उल्लेखनीयतेति शोधने बद्धा अंजलिमर्हाणां विरम्यते।

विक्रमसंवत् १९९४ ज्येष्ठशुक्लप्रतिपदि चन्द्रघस्रे। लेखकाः—आनन्दोदन्वन्तः पादलिप्तपुरात्।

For Private and Personal Use Only

श्रीश्रेणिकचरित्रविषयक्रमः

विषयः	पृष्ठं
श्रीश्रेणिकपूर्वभवः	१
श्रीश्रेणिकजन्म	२
सुलसावृत्तं	३
श्रेणिकपरीक्षा	५
नन्दापरिणयनं	६
राज्यप्राप्तिः	६
अभयस्य राजगृहागमनं	७
मुद्रिकाकर्षणं	७
अभयसत्कारः	८
सुज्येष्ठाचेल्लणावृत्तं	९
कोणिकजन्म	१२
प्रसन्नचंद्रवृत्तं	१४
दर्दुरांकामरागमनं	१८
नरकायुस्त्रोटनोपायप्रश्नः	२१
देवविहिता श्रेणिकपरीक्षा	२२
कालशौकरिकवृत्तं	२२
सुलसश्राद्धः	२३
काष्ठहारकदीक्षा	२४
लोके उपहासः	२४
अभयकृवस्तत्समाधिः	२४
मन्त्र्याद्युक्तमांससमर्घतास्फोटः	२५
प्रव्रज्याप्राप्तिकथनं	२६
चेल्लणांतःपुरदाहः	२७
अभयदीक्षा	२८
श्रेणिकमरणं	२९
कोणिकगतिः	२९
पुण्यपालस्वप्नफलानि	३०
कुवृष्टिन्यायः	३१
भाविकालस्वरूपं	३२
कल्किवृत्तं	३३
षष्ठारकस्वरूपं	३७
पद्मनाभतीर्थपतिजन्मादि	३८
भाविकालशलाकापुरुषाः	३८

समाप्तं श्रीश्रेणिकचरित्रं

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अमूल्य ग्रन्थ रत्नानि—(प्राप्तिस्थानं-श्रीजैनआनंदपुस्तकालय गोपीपुरा—सुरत.)

१ अहिंसाष्टकं, सर्वज्ञसिद्धिः, ऐन्द्रस्तुतयश्च ०-८-०
२ अनुयोगद्वारचूर्णिः, तद्वृत्तिः (हारिभद्रीया) १-१२-०
३ आचारांगसूत्रं सटीकं ७-०-०
४ उत्तराध्ययनचूर्णिः ३-८-०
५ उपदेशमाला सटीका(पुष्पमाला) ६-८-०
,, मूलं (धर्मदास०) ०-८-०
,, सच्छाया (मुद्रणालये)
६ उत्पादादिसिद्धिः २-८-०
७ ऋषिभाषितानि सूत्राणि ०-५-०
८ श्रीकल्पसूत्रकौमुदी २-०-०
,, सुबोधिका (मुद्रणालये)
९ ज्योतिष्करंडकः सटीकः ३-०-०
१० तत्त्वतरंगिणी सटीका ७-८-०
११ श्रीतत्त्वार्थसूत्रं सभाष्यं १-०-०
,, सभाष्यं सटीकं च (हारिभद्रीयं) ६-०-०
१२ श्रीदशवैकालिक चूर्णिः ४-०-०
१३ नंदिसूत्रचूर्णिः, तद्वृत्तिश्च (हारिभद्रीया) १-१२-०
१४ पर्युषणादशशतकं सटीकं ०-१०-०
१५ पंचाशकादिशास्त्राष्टकं ४-०-०
,, दशाकारादि ४-०-०
१६ पयरणसंदोह १-०-०
१७ प्रकरणसमुच्चयः १-०-०
१८ प्रवचनपरीक्षा सटीका १०-०-०
१९ प्रत्याख्यान, सारस्वतविभ्रमः,- दानषट्त्रिंशिका, विशेषणवती, विंशतिविंशतिका च १-४-०
२० बृहत्सिद्धप्रभाव्याकरणम् २-८-०
मध्यमसिद्धप्रभाव्याकरणम् ०-८-०
२१ बुद्धिसागरः ०-३-०
२२ भवभावना सटीका ७-२-०
२३ युक्तिप्रबोधः १-१२-०
२४ ललितविस्तरा ०-१०-०
२५ विशेषावश्यकभाष्यं सटीकं (कोट्याचार्य०) ११-०-०
२६ वन्दारुवृत्तिः १-४-०
२७ षोडशकप्रकरणम् (सटीकं) १-०-०
२८ षडावश्यकसूत्राणि ०-८-०
२९ अंगाकारविषयक्रमादि ४-०-०
३० भगवतीसूत्रं सटीकं प्रथमो भागः (अभयदेवीयं) ५-०-०
,, द्वितीयतृतीयौ (मुद्रणालये)
३१ श्रीकृष्णचरित्रं ०-१०-०
३२ श्रीश्रेणिकवृत्तं (इदं) ०-६-०

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

श्रीतपोगच्छगगनभानुश्रीदेवेन्द्रसूरिसूत्रितं

श्री श्रेणिकचरित्रम्। (संस्कृतं)

ज्ञातमात्रं जगज्ज्ञातमार्हंत्याख्ये महाफले। श्रेणिकोऽपि नृपो येन, तत्कथाऽतः प्रपंच्यते ॥१॥ अस्त्यत्र भरतक्षेत्रे, कुशाग्रपुरपत्तनम्। कुशाग्रीयमतिस्तत्र, प्रसेनजिदिलापतिः ॥ २ ॥ हस्त्यश्वरथपत्त्यादि, शोभायै तस्य केवलम्। चिच्छिदेऽरितमः स्वस्य, प्रतापतपनांशुभिः ॥३॥ चित्ते शीलं करे दानं, तपोऽंगे हृदि भावनाम्। बिभ्रत् स राजा शुशुभे, जैनधर्म्म इवांगवान् ॥४॥ श्रीपार्श्वनाथसत्तीर्थे, तस्य भूपस्य निश्चला। बभूव भूयसी भक्तिः, कंबले जतुरागवत् ॥५॥ अद्वैतैश्वर्यसौंदर्यत्वर्यस्यास्य महीपतेः। गरीयानवरोधोऽभूद्दिवीव दिविषत्पतेः ॥ ६ ॥ पृथग्राज्ञीभवास्तस्य, सूनवः शतशोऽभवन् । रूपादिगुणसंयुक्तास्तन्मूर्त्तय इवापराः ॥७॥ —इतश्चात्रैव भरते, वसंतपुरपत्तने। जितशत्रुरभूद् राजा, प्रतापी न्यायविश्रुतः ॥८॥ तस्यामरवधूरम्भाऽभूद् भार्याऽमरसुंदरी। मूर्त्याऽमरकुमाराभः, कुमारश्च सुमंगलः ॥९॥ पिंगकेशशिराः शृंगज्वलद्वह्निरिवाचलः। मार्जार इव पिंगाक्षः, कपिवच्चीननासिकः ॥१०॥ मयवल्लंबकंठोष्ठश्चाखुवल्लघुकर्णकः। स्थूलोदरो विना व्याधिं, दकपूर्णो दृतिर्यथा ॥११॥ ह्रस्वोरुर्वामन इव, दुष्कर्म्मविनियोगतः। मंडलस्थानसंलीढयोधवद् वक्रजंघकः ॥१२॥ शूर्पवत् स्थूलगुल्फश्च, मंत्रिसूः श्येनकाभिधः। सुमंगलकुमारस्य, क्रीडामित्रमभूत् सदा॥१३॥ चतुर्भिः कलापकं॥ कुमारस्य सभामेति, वराकः स यदा तदा। वक्रोक्त्या राजपुत्रस्तमुपहासास्पदं व्यधात् ॥१४॥ सुमंगलकुमारेण, हस्यमानो दिने दिने। वैराग्यं श्येनको भेजे, दुःखगर्भं विमूढधीः ॥१५॥ गत्वा देशांतरे कस्मिन्,

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

परिव्राजकसन्निधौ। जग्राह दुःखभीर्दीक्षामुष्ट्रिकाभिग्रहान्विताम् ॥१६॥ सुमंगलकुमारोऽथ, पित्रा राज्ये निवेशितः। प्रौढपुण्यप्रभावेण, प्राज्यं साम्राज्यमन्वशात् ॥१७॥ श्येनकोऽपि परिभ्राम्यन्, देशाद्देशं पुरात्पुरम्। वसंतपुरमभ्यागात्, तपस्यन् दुस्तपं तपः ॥१८॥ तपस्वी मंत्रिपुत्रश्च, पूर्वसंस्तुत इत्यपि। पौरास्तं पूजयामासुरर्घदानादिभिर्भृशम् ॥१९॥ अपृच्छंश्च सनिर्बंधं, मूलवैराग्यकारणम्। सोऽपि माध्यस्थ्यमास्थाय, कथयामासिवानिदम् ॥२०॥ तिक्तौषधरसास्वादो, यद्वदारोग्यकारणम्। सुमंगलाट्टहासो मे, तद्वद् वैराग्यकारणम् ॥२१॥ ज्ञात्वा श्येनकमायातं, सुमंगलनृपोऽपि हि। तं प्रणंतुं ययौ हृष्टस्तपसा को न हृष्यति ! ॥२२॥ क्षमयित्वा च नत्वा च, भूपतिः प्रीतमानसः। न्यमंत्रयत् तं तन्मासः, पारणाय कृतादरः ॥२३॥ श्येनकस्तद्वचो मेने, ययौ राजा स्वमंदिरे। मासांते पारणायागात्, श्येनकोऽपि नृपौकसि॥२४॥ तदा च महदस्वास्थ्यमभूद् भूमिपतेस्तनौ। राजलोकस्ततो व्यग्रस्तमृषिंकोऽपि नैक्षत ॥२५॥ क्षणं स्थित्वा निवृत्त्याथ, श्येनकोऽकृतपारणः। द्वितीयं मासक्षपणं, कर्तुं प्राविशदुष्ट्रिकाम्॥२६॥ राजाऽथ स्वस्थतां प्राप्तः, स्मृत्वा च स्वनिमंत्रणम्। तत्काशकुसुमवन्मोघं, मत्वाऽनिंदद् भृशं स्वकम्॥२७॥ विषण्णात्मा ततो गत्वा, श्येनकस्यांतिकं द्रुतम्। तं नत्वा गद्गदध्वानो, व्यजिज्ञपदिदं नृपः ॥२८॥ यथा दातुः प्रियालापः, स्यादन्यत्रापि विघ्नकृत्। तथा मे मंदभाग्यस्य, बभूवेदं निमन्त्रणम् ॥२९॥ तथापि मम दीनस्य, क्षमस्वैतत् क्षमानिधे ! । प्रसद्य चानुमन्यस्व, मद्गेहेऽद्योऽपि पारणम् ॥३०॥ अनुनीतो नृपेणैवं, प्रपेदे श्येनकोऽपि तत्। ततो नत्वा गृहेऽगच्छन्मुदितो मेदिनीपतिः ॥३१॥ ययौ यावत् तपस्व्येष, संप्राप्ते पारणाहनि। नृपौकस्तावदास्थानमभूत्तस्य महत्तरम् ॥३२॥ तथैव विनिवृत्त्यासौ, पुनः प्राविशदुष्ट्रिकाम्। तं चानुनेतुं तत्रागात्, स्वस्थीभूतः सुमंगलः ॥३३॥ मुंचन्नश्रांतमश्रूणि, नत्वोचे तमृषिं नृपः। भगवन् ! भवतामेवं, धिग्मां दुष्कर्म्मकारिणम् ॥३४॥ सर्वंसहावदाराध्याः, सदा सर्वंसहा मयि। तत्प्रसद्यानुगृह्णंतु, पारणेनाधुनाऽपि माम् ॥३५॥ प्रपेदे नृपदाक्षिण्यात्, तृतीयमपि ॥२॥

For Private and Personal Use Only

पारणम् । श्येनकर्षिस्ततो राजा, धन्यंमन्यो गृहं ययौ ॥३६॥ पूर्णेऽथ मासक्षपणे, यावत्तत्र ययावृषिः । बृहत्तरतमं तावद्, राज्ञोऽस्वास्थ्यमजायत ॥३७॥ राजलोकास्त्विदं दध्यावयमेति यदा यदा । तदा तदा महीभर्तुः, सहसा जायते रुजा ॥३८॥ इति तैः श्येनकः क्रुद्धैर्यष्टिलोष्टादिभिर्भृशम् । यथेष्टं कुट्टितो गेहे, प्रविष्ट इव तस्करः ॥३९॥ संचूर्णितसमस्तांगश्चिंतयामास चेतसि । नूनं सुमंगलो राजा, मत्सरी मयि सर्वदा ॥४०॥ भवांतरेऽस्य भूयासं, वधाय तपसाऽमुना । निदायेति विपद्याभूदल्पर्द्धिर्व्यंतरोऽथ सः ॥४१॥ गृहीत्वा तापसीं दीक्षां, सुमंगलनृपोऽपि हि । कालेन मृत्वा भूत्वा च, व्यंतरः स ततश्च्युतः ॥४२॥ तस्मिन् कुशाग्रनगरे, प्रसेनजिदिलापतिः । धारिण्याख्यमहादेव्या, उदरे समवातरत् ॥४३॥ सा देवी समयेऽसूत, सुनुमन्यूनलक्षणम् । सर्वर्द्धया विदधे पित्रा, तस्य जन्मोत्सवो महान् ॥ ४४ ॥ विशिष्टमतिधृत्यादिगुणश्रेणिभृदित्ययम् । ततः श्रेणिक इत्याख्यां, पिता तस्य स्वयं व्यधात् ॥४५॥ श्रेणिको ववृधे रूपसौभाग्यादिभिरन्वहम् । कलाभिर्नव्यनव्याभिः, शुक्लपक्ष इवोडुपः ॥४६॥ शुशुभे श्रेणिकांगश्रीः, यौवनेन विशेषिता । यथा मधुश्रीर्मलयमारुतेन विशेषिता ॥ ४७ ॥–इतोऽत्राभूत् पुरे नागरथिको नागवल्लभः । पत्नी च सुलसा तस्य, धर्म्मकर्म्मसु लालसा ॥४८॥ तयोः सदैकमनसोर्दंपत्योः प्रीतिपात्रयोः । भूयान् कालः सुखेनागाद्यथा भारुंडपक्षिणोः॥४९॥ परं गाढमपुत्रत्वं, हृदि नागस्य शल्यवत् । बाधतेऽहर्निशं यद्वा, चक्षुषोः कर्करो यथा ॥५०॥ चिंताप्रपन्नमन्येद्युः सुलसोचे निजं पतिम् । युष्माकं बाधतेऽंगे किं, कश्चिच्छूलादिरामयः? ॥५१॥ अप्रसन्नो नृपः किं वा, नादृतं स्वजनेन वा । मित्रेण किमवज्ञातं, किंचित्परिजनेन वा ? ॥५२॥ सदाऽऽदेशविधायिन्या, मयाऽऽज्ञा काऽपि खंडिता । यदेवं ताम्यसि स्वांते, स्वामिंस्तन्मां निवेदय ॥५३॥ रथिकस्त्वाह नैतेभ्यो, मामेकमपि बाधते । प्रियेऽनपत्यता यत्तन्मामतीव विबाधते ॥५४॥ सुलसोचे सुतार्थे त्वमन्यां कन्यां विवाहय । स्वाम्यूचे कृतमन्याभिः, कन्याभिरिह जन्मनि ॥५५॥ ततोऽधिकं तपोदानशीलार्चाभावनादिके । सुधर्मे

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

सुलसा तस्थौ,स हि सर्वत्र कामधुक् ॥५६॥–इतश्च दिवि देवेन्द्रः,सदस्येवमवर्णयत् । श्राविका सुलसा धर्म्मे, निश्चला शैलराजवत् ॥५७॥ तद्वचोऽश्रद्दधानोऽत्रागत्यैकस्त्रिदशोऽविशत् । कृत्वा नैषेधिकीं साधुवेषेण सुलसागृहे ॥५८॥ तदा जिनार्चां कुर्व्वती,सुलसा द्रागुपस्थिता । भक्त्या नत्वा च तं साधुं,पप्रच्छागमकारणम् ॥५९॥ स प्राहात्र पुरे भद्रे !, मुनिर्ग्लानोऽस्ति तत्कृते । तैलाय लक्षपाकाय, श्राविकेऽहमिहागमम् ॥६०॥ तुष्टाऽथ सुलसा तैलकुंभमादाय पाणिना । प्रतिलंभयितुं साधुं,यावदागाच्छनैः शनैः ॥६१॥ तावत् सुपर्वणाऽचिंत्यशक्तिना स्फोटितः कुटः । तत्तैलमपि कुत्रापि, सर्वमप्यगमद् द्रुतम् ॥६२॥ इत्यस्फोटि द्वितीयोऽपि, तृतीयोऽपि घटः क्षणात् । द्रव्यहान्या सुबह्व्याऽपि, व्यषीदत् सुलसा न तु ॥६३॥ दध्यौ चेदं मुनौ ग्लाने,ययौ यन्नोपयोगिताम् । निर्दोषौषधमप्यत्र, ममेयं ही प्रमादिता॥६४॥ अथ संहृत्य तां मायां, प्रत्यक्षीभूय सोऽमरः । निवेद्येन्द्रकृतां श्लाघामूचे भद्रे ! वरं वृणु॥६५॥ जगाद सुलसाऽप्येवं, पतितोषकृते मम । देहि पुत्रमपुत्रायास्ततोऽवादीदिद सुरः ॥६६॥ गृहाण गुटिका एता, द्वात्रिंशतमपि क्रमात् । भक्षयेस्ते भविष्यंति, पुत्रा द्वात्रिंशदुत्तमाः ॥६७॥ ताः समर्प्य पुनः कार्ये,स्मर्त्तव्योऽहं त्वयाऽनघे ! । इत्युक्त्वा स ययौ स्वर्गमुत्पत्य गगनाध्वना॥६८॥ सुलसाऽचिंतयच्चैवं, प्रत्यब्दं प्रसवव्यथाम् । समांसमीनाऽनड्वाहीवत् को ननु सहिष्यति ? ॥६९॥ देवदत्तास्ततश्चैता, गुटिका एकवेलया । भक्षयामि ततोऽमूभिः, पुत्रो मे भवितोत्तमः ॥७०॥ तथैव सुलसा चक्रे, पुत्रा द्वात्रिंशदप्यथ । उत्पेदिरे तदुदरे,नान्यथा दिविषद्गिरः॥७१॥ वर्धमानांश्च तान् गर्भान् ,सा धर्तुमसहाऽभवत् । प्रभूतफलसंभारमिव वल्ली दिने दिने॥७२॥ ततः सस्मार तं देवं, सोऽप्यागत्याब्रवीदिदम् । किं स्मृतोऽहं त्वया भद्रे !, साऽथाचख्यौ निजां व्यथाम् ॥७३॥ बभाषेऽनिमिषोऽप्येवं, त्वया साधु कृतं नहि । द्वात्रिंशदपि ते पुत्रा, भविष्यंति समायुषः ॥७४॥ दैवानुभावतः पीडां,सोऽपहृत्य तिरोदधे । कालेन सुलसाऽसूत, सुतान् द्वात्रिंशतं वरान् ॥७५॥ धन्यंमन्योऽथ नागोऽपि, पुत्रजन्मोत्सवं व्यधात् । पुत्रान् प्रीत्या पृथग् धात्रीपंचकैः

For Private and Personal Use Only

पर्यपालयत् ॥७६॥ अंकेऽथ हृदि पृष्ठे च, स्कंधयोस्तैः समाश्रितः । नागोऽभादर्भकारूढः, फलेग्रहितरुर्यथा ॥७७॥ सुखेनोपकलाचार्यमधीत्य सकलाः कलाः। उद्यौवना बभूवुस्ते, श्रेणिकस्यानुयायिनः॥७८॥-प्रसेनजिन्महीनाथो, राज्यार्हत्वं परीक्षितुम् । भुंजानानां स्वपुत्राणां, सूदेनामोचयच्छुनः ॥७९॥ नेशुः सर्वेऽपि राजन्याः, श्रेणिकस्त्वात्मनोऽभितः । तत्पात्राण्यंतरा चक्रे, बुभुजे च यथासुखम् ॥८०॥ राजा पुनः परीक्षार्थं, मोदकानां करंडकान् । ददौ निजकुमाराणां, पयःकुंभांश्च मुद्रितान् ॥८१॥ इमां मुद्रामभिंदाना, यूयमश्नीत मोदकान् । तथैव पिबतांभश्च, पुत्रानित्यादिदेश च ॥८२॥ कुमारा बलवंतोऽपि, भोक्तुं पातुं च नाशकन् । बुद्धिसाध्येषु कार्येषु, कुर्युरुर्जस्विनोऽपि किम् ?॥८३॥ श्रेणिकस्तु गृहे नीत्वा,तं मोदककरंडकम् । चालं चालं क्षरच्चूर्णं, स्वर्णस्थालस्थमाशिवान्॥८४॥ धृत्वा रूप्यमयीं शुक्तिं,तत्पयःकुंभबुध्नके । गलद्वाबिंदुपूर्णां तामुत्पाट्य च पयः पपौ ॥८५॥ सर्वमेतत्परिज्ञाय,हृदये धृतवान्नृपः।-तदा च नगरे तत्रासकृद् जज्ञे प्रदीपनम्॥८६॥ ततश्चाघोषयामास,पुरे राजेति यद्गृहात् । उत्थास्यत्यनलः सोऽस्मात् , पुरान्निष्कासयिष्यते ॥८७॥ अन्येद्युर्मेदिनीभर्तुर्गृहे सूदप्रमादतः। जज्ञे प्रदीपनं ह्यग्निर्यमश्च स्यो न कस्यचित् ॥८८॥ राज्ञा पुत्राः समादिष्टा, यो यद् गृह्णाति तस्य तत् । ततस्ते निर्ययुः शीघ्रं,गृहीत्वाऽश्वगजादिकम्॥८९॥ श्रेणिकस्तु समादाय, जयभंभां विनिर्ययौ । युक्तिमत्राह पृष्टोऽसौ, राज्ञा शांते प्रदीपने ॥९०॥ एषैव देव! भूपानां, जयश्रीचिह्नमादिमम् । यत्नेन तेन रक्ष्येयं, नित्यं जीवितवन्नृपैः ॥९१॥ इत्याकर्ण्य वचस्तस्य, श्रेणिकस्य ददौ मुदा । भंभासार इति क्षोणिपतिर्नामापरं तदा ॥९२॥ सस्मार च वचः स्वीयं, सत्यसंघः प्रसेनजित् । ततः पुराद् द्विगव्यूत्या, स्वस्मै गृहमकारयत् ॥९३॥ सांतःपुरपरीवारस्तत्रोवास स्वयं नृपः । व्यवहर्तुं जनोऽप्यत्र, यानायान् प्रश्नितोऽवदत् ॥९४॥ यामि राजगृहं राजगृहादायामि चेति तत् । जज्ञे चैत्यादिना रम्यं, नाम्ना राजगृहं पुरम् ॥९५॥ पुत्रपौत्रयुतो राज्यं, कुर्वंस्तत्र महीपतिः । ज्ञातपूर्वी स्वतुगवृत्तं, चिंतयामास चेतसि ॥९६॥ स्वराज्यं

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

मोक्ष्यते तावद्, विक्रमेण धिया स्वयम्। अन्येषामपि राज्यानि, राज्यार्हः श्रेणिकस्ततः ॥९७॥ किं त्विदानीमसत्कार्यो, मार्यो माऽन्यैरसौ सुतैः। इत्यन्येषां कुमाराणां, ददौ ग्रामादिकं नृपः ॥ ९८ ॥ श्रेणिकस्त्वपमानेन, तेन देशांतरं प्रति। प्राचालीदचलो भीत्या, केसरीव वनांतरम् ॥९९॥ जगामाश्रांतमभ्रांतः, खड्गव्यग्रकरोऽध्वनि। क्रीडां कर्तुमिवोद्यानमार्गेऽनघप्रमोदभाक्॥१००॥ गच्छन् क्रमेण स प्राप, पुरं बेन्नातटाभिधम्। यच्छ्रीकल्लोलमालाभिर्वेलातटमिवाबभौ ॥१०१॥ भद्रस्य वणिजस्तत्र, विपणौ स पणायतः। कर्म्म लाभोदयं नाम, तस्य मूर्त्तमिवाययौ ॥१०२॥ दिने तस्मिंश्च तत्राभूद्विशिष्टः कश्चिदुत्सवः। ततस्तच्छ्रेष्ठिनो हट्टे क्रेतुमागाज्जनो बहुः॥१०३॥ श्रेणिको लघुहस्तत्वाद्, बद्ध्वा बद्ध्वाऽऽर्पयद् द्रुतम्। क्रायकाणां वरद्रव्यपुटिकात्रुटिकादिकम्॥१०४॥ लाभश्च तत्प्रभावेण, भूयिष्ठः श्रेष्ठिनोऽभवत्। कस्याद्यातिथयो यूयं, ततः श्रेष्ठी तमभ्यधात्॥१०५॥ श्रेणिकोऽपि बभाषे वः, ततोऽसौ पर्यचिंतयत्। नंदायोग्यो वरः स्वप्ने, यो मयाऽदर्शि सैष किम्?॥१०६॥ ततः श्रेष्ठी निजौकस्तं, नीत्वा संस्नाप्य चादरात्। परिधाप्य सुवासांसि, भोजयित्वैवमब्रवीत् ॥ १०७ ॥ नंदानाम्नीं सुतां मे त्वमिमामुद्वह मानद!। स प्राह कथमज्ञातकुलादेर्मम दास्यसि? ॥१०८॥ श्रेष्ठ्यूचे सर्वमज्ञायि, गुणैस्तव कुलादिकम्। परिणिन्ये ततो नंदां, सानंदो नृपनंदनः ॥१०९॥ भुंजानो नंदया सार्धं, तत्र वैषयिकं सुखम्। श्रेणिकोऽस्थात्कियत्कालं, गर्भं दध्रेऽथ भद्रजा ॥११०॥ राजा श्रेणिकवृत्तांतमज्ञासीद् गुप्तपुरुषैः। सहस्राक्षा हि राजानो, भवंति चरलोचनैः॥१११॥ अन्यदा रोगमत्युग्रमाससाद प्रसेनजित्। ततः श्रेणिकमाह्वातुं, प्राहिणोदौष्ट्रिकानसौ ॥११२॥ श्रेणिकस्य नृपाह्वानमेकांते तैर्निवेदितम्। नंदां संभाष्य तस्यै सोऽक्षराण्येतानि चार्प्पयत् ॥११३॥ वयं राजगृहे पांडुकुड्या गोपास्ततः स्वयम्। करभीं तां समारुह्य, ययौ जनकसन्निधौ ॥११४॥ तं चाभ्यषिंचत् साम्राज्ये, सुप्रसन्नः प्रसेनजित्। पूर्णकुंभांबुधाराभिर्नेत्रहर्षाश्रुभिः समम् ॥११५॥ ततः पंचनमस्कारं, स्मरन् पार्श्वजिनं नृपः। विधायाराधनं धीरो, विपद्य त्रिदिवं ययौ

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

॥११६॥ सर्वं सर्वंसहाभारं, बभारैकोऽपि शेषवत् । श्रेणिकस्तु तथैकोनां, मंत्रिपंचशतीं व्यधात ॥ ११७ ॥ संपूर्णामथ तां कर्तुं, जिज्ञासुर्धीधनं नरम् । पुरुषैः क्षेपयामास, शुष्ककूपे निजोर्मिकाम् ॥११८॥ अघोषयच्च यो मुद्रां, तटस्थो लाति पाणिना । स्वां पुत्रीं मंत्रिधुर्यत्वं, राज्यार्द्धं राति तस्य राट् ॥११९॥ भूयानपि जनोऽभ्यागादादातुं स्वकरेण ताम् । किन्तु कुब्ज इवाशक्तः, फलमत्युच्चशाखिनः ॥१२०॥–इतश्च तस्या नंदाया, अन्यदा दोहदोऽभवत् । रांती दानं गजारूढा, अमाम्यभयदा पुरे ॥१२१॥ पित्रा नृपमनुज्ञाप्य, तस्याः सोऽपूरि दोहदः । कालेनासूत सा सूनुं, रत्नं वैडूर्यभूरिव ॥१२२॥ कृत्वा मातामहस्तस्य, महांतं जननोत्सवम् । सूनोरभय इत्याख्यां, दोहदानुसृतेर्ददौ ॥१२३॥ ववृधे लाल्यमानोऽसौ, धात्रीभिः पंचभिः क्रमात् । रूपलावण्यसौभाग्यैः, कलाभिर्नव्यचंद्रवत् ॥१२४॥ कलाचार्यस्य भद्रेणार्पितो भद्रदिने सुतः । द्राक् तेनाबोधि दीपेन, दीपवत् सकलाः कलाः ॥१२५॥ विनीतमुद्यतं शांतं, धीमंतममितौजसम् । गुरुस्तमिति विज्ञाय, प्रशशंस पदे पदे ॥ १२६ ॥ एकांते तु सहाध्यायी, तमूचे कोऽपि मत्सरी । किं ते गुणांतरैर्यस्य, पिता विज्ञायते नहि ? ॥१२७॥ अभयोऽप्याह भद्रो मे, पिताऽस्ति विपणौ स्थितः । स प्राह ननु ते मातुः, पिता भद्रो न ते पुनः ॥१२८॥ गत्वोपनंदमानंदमुक्तो नांदेय ऊचिवान् । ब्रूहि मातः ! पिता को मे ?, साऽपि भद्रमचीकथत् ॥१२९॥ अभयोऽप्यभ्यधाद् भूयो, ननु भद्रः पिता तव । यथाज्ञातमनाबाधं, तातः को मे ? निवेद्यताम् ॥१३०॥ रुदंती साह सा कोऽपि, पुमान् वैदेशिकस्तु माम् । उद्वाह्य त्वयि गर्भस्थेऽगात् कुत्राप्यौष्ट्रिकैः समम् ॥१३१॥ ऊचेऽभयकुमारोऽपि, किमुक्तं तेन गच्छता । तानि न्यासीकृतानीवाक्षराण्यस्मै ददर्श सा ॥१३२॥ गोपाः पांडुरकुड्यास्तन्नूनं राजा पिता मम । करोति राज्यं तत्रावां, व्रजावो मातरंजसा ॥१३३॥ भद्रो ज्ञात्वाऽतिनिर्बंधं, सामग्रीं परिकल्प्य च । समं दुहित्रा दौहित्रं, विससर्ज शुभे क्षणे ॥१३४॥ क्रमेणाध्वानमुल्लंघ्य, प्राप राजगृहं पुरम् । नंदां तस्माद् बहिर्मुक्त्वा, पुरांतस्त्वात्मनाऽविशत् ॥१३५॥ अगात् कूप-

मुद्रिका-कर्षणं:

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

तटे तत्र, दृष्ट्वा च मिलितं जनम् । किमेतदिति तेनोक्ते, जनः सर्वोऽप्यवोचत ॥१३६॥ आदत्स्व मुद्रिकामेनां, पाणिना तत्पणीकृतम् । राज्यार्धं मंत्रिधुर्यत्वं,राट्पुत्रीं च वराकृते ! ॥१३७॥ अभयोऽप्यभ्यधादेवं, भवंतः किं न गृह्णते ? । तेऽप्युचुर्गगनाल्लातुं, शक्या तारा करेण किम् ?॥१३८॥ततो जघान तामार्द्रगोमयेण नृपात्मजः। तत्सद्योऽशोषयत् क्षिप्त्वा,ज्वलंतं तृणपूलकम् ॥१३९॥ मुक्त्वा वाःसारणीं वाप्यास्तं कूपं द्रागपूरयत् । तरंतीं गोमयस्थां तामाददे पाणिनाऽभयः ॥१४०॥ यामिकैः कथितेऽमुष्मिन्, वृत्तांते भूपतेः स तु। आनाययत नांदेयं, सोऽपि गत्वाऽनमत् नृपम् (ग्रं० ३०००) ॥१४१॥ उपवेश्यासने राजा, निजासन्ने तमभ्यधात् । कुतस्त्वमागमः? सोऽपि, प्रोचे बेन्नातटात्प्रभो ! ॥१४२॥ स्मृत्वा नंदां नृपोऽपृच्छत्तं धृत्वा पाणिपल्लवे । भद्रं भद्रमुखाख्याहि, भद्राख्यं तत्र वाणिजम् ॥१४३॥ नंदानाम्नीं च तत्पुत्रीं, वत्स! जानासि वा नवा? । स प्राहाजन्मतोऽप्येतद्द्वयमप्युपलक्षये ॥१४४॥ वत्स! नंदोदरिण्यासीत्तस्याः किमुदपद्यत ? । ऊचेऽभयकुमाराख्यं, सा नंदनमजीजनत् ॥१४५॥ राजाऽवदत् स कीदृक्षो, रूपेण वचसाऽपि च। अभयोऽप्यब्रवीत् स्वामिन्!, यादृशोऽहं स तादृशः॥१४६॥ शंकमानोऽवदद्राजा, ननु त्वमसि सोऽभयः ?। स स्माह स्वामिपादा हि, मतिमंतो विदंति तत् ॥१४७॥ राजा तमात्मजं ज्ञात्वा, स्वाङ्कमारोप्य सस्वजे। अपृच्छच्च क्व ते माता ?, सोऽशंसन्नगराद् बहिः ॥१४८॥ अभियानाय नंदायै,सामंतादीनथादिशत् । गंधहस्तिनमारुह्य, स्वयं चापि नृपोऽभ्यगात् ॥१४९॥ अभयेनाग्रतो गत्वा, नंदाऽऽत्मानमलंचिकीः। वारिताऽस्थात् स्वभावस्था, पतिव्रतोचितं ह्यदः ॥१५०॥ कृत्वाऽथ स्फारशृंगारं, राज्ञा दत्तं सुतान्विता। गंधसिंधुरमारूढा, सह पत्याऽविशत्पुरम् ॥१५१॥ प्रासादादि प्रदायास्या, नृपतिः प्रीतमानसः। पदं विश्राणयामास, सीताया इव राघवः ॥१५२॥ तथाऽभयकुमाराय, राज्यार्धं मंत्रिधुर्यताम् । सेनानाम्नीं स्वसुः पुत्रीं, सत्यवाक् श्रेणिको ददौ ॥१५३॥ ततोऽभयकुमारोऽपि, चतुर्बुद्धिमहानिधिः। दुःसाधान् साधयामास, धियैव वसुधाधवान् ॥१५४॥ सम्य-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

प्रीतिलताकंदः, पितुर्भक्तोऽभयस्ततः। सप्तांगं सुस्थितं राज्यं, धीमानन्वशिषत् पुनः ॥१५५॥—वैशाली श्रीविशालापूरितश्चास्ति मही-
तले। तस्यां च चेटकश्चेटीकृतारिखनीपतिः ॥१५६॥ पृथग्राज्ञीभवास्तस्य, सप्तासन् वरपुत्रिकाः। सप्तांगस्यापि राज्यस्याधिष्ठात्र्य
इव देवताः ॥१५७॥ राजाऽन्योपयमत्यागान्न तु ताः पर्यणाययत्। मातृदत्तास्तु पंचैताः, परिणिन्युर्नृपा अमी ॥१५८॥ तत्र प्रभा-
वतीं वीतभयेशोदायनो नृपः। पद्मावतीं तु चंपेशो, दधिवाहननामकः ॥१५९॥ कौशंबीशः शतानीको, मृगनेत्रां मृगावतीम्।
शिवां चोज्जयिनीनाथश्चंडप्रद्योतभूपतिः ॥१६०॥ ईशः क्षत्रियकुंडस्य, ज्येष्ठाख्यां नंदिवर्धनः। सुज्येष्ठाचेल्लनानाम्न्यौ, कुमार्यावेव
तस्थतुः ॥१६१॥ अन्यदा तापसी वृद्धा, कन्यांतःपुरमेयुषी। शौचमूलं समाचख्यौ, धर्मं सा मूलमंहसः ॥१६२॥ सुज्येष्ठा प्राह
हे मुग्धे!, मुग्धलोकप्रतारिके। धर्म्मः खलु दयामूलः, स च शौचात् कथं भवेत्?॥१६३॥ भूर्जलं जलजा जीवास्त्रसा भूम्याश्रिता अपि।
संख्यातीता विराध्यंते, स्नानाय भवतामपि ॥१६४॥ मृत्तिकोदकसंस्पर्शाच्छुध्यंति यदि जंतवः। कुलालः सकुटुंबोऽपि, तर्हि
स्वर्गं व्रजिष्यति॥१६५॥ चेत् शुध्यंति बहिःस्नानादंतः पापमलीमसाः। तत् शुध्यंति ध्रुवं मत्स्यमकराद्या ह्रदादिषु॥१६६॥ मुग्धे!
पंचाश्रवत्यागात्, पंचेंद्रियदमादपि। कषायविजयाद् धर्म्मस्तथा दंडत्रयोज्झनात् ॥१६७॥ इत्यादियुक्तियुक्ताभिर्भारतीभिर्निरुत्त-
राम्। सुज्येष्ठा तापसीं चक्रे, मौनव्रतपरामिव ॥१६८॥ दास्यादयो हसंत्यस्तां, मुखमर्कटिकादिभिः। गेहान्निःसारयंति स्म, भिक्षुकीं
ग्रथिलामिव ॥१६९॥ सुज्येष्ठोपरि सा क्रुद्धा, दध्यौ दुर्धीरिमां ध्रुवम्। क्षेप्स्यामि पंडितंमन्यां, सपत्नीदुःखसागरे ॥१७०॥ आलिख्य
चित्रपट्टे च, तद्रूपं श्रेणिकाय सा। उपनिन्ये स तां वीक्ष्यापृच्छत् केयं वराकृतिः? ॥१७१॥ साऽऽख्यच्चेटकराजस्य, सुज्येष्ठानामिका
सुता। इमा लक्ष्मीपतिर्लक्ष्मीमिवोद्वोढुं त्वमर्हसि ॥१७२॥ ततस्तां याचितुं प्रैषीद्वैशाल्यां श्रेणिको नरान्। सुज्येष्ठां याचितः पुंभि-
श्चेटकोऽप्येवमब्रवीत् ॥१७३॥ कथं वाहीकवंश्योऽयं, कन्यां हैहयवंशजाम्। स्वीकर्तुं श्रेणिको वांछेद् बको हंसीमिवामतिः?॥१७४॥ ॥९॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

न दास्यामि सुतां तस्मै, ततो व्याधुट्य तेऽभ्यधुः । श्रेणिकाय यथावृत्तं, श्रुत्वैतद् विषसाद सः ॥१७५॥ एतद् ज्ञात्वाऽभयोऽप्यूचे, विषादं देव ! मा कृथाः । अचिरेणैव कालेन, करिष्ये वः समीहितम् ॥१७६ । इत्युक्त्वा रूपमालिख्य, राज्ञोऽसौ चित्रपट्टके। विधाय वणिजो वेषं, वैशाल्यामगमत्ततः ॥१७७॥ तत्रापणे पणायंश्च, कन्यांतःपुरसन्निधौ । तद्दासीनामदात् पण्यं, समर्घं सुंदरं घनम् ॥१७८॥ तदा चानर्च चित्रस्थां, श्रेणिकार्चां स्रजादिभिः । तासां चाख्याद्यथाऽर्चामि, सदाऽमुं श्रेणिकं प्रभुम् ॥१७९॥ सुज्येष्ठायै तदाचख्युर्दास्यः साऽप्यन्यदाऽवदत् । अत्रानयत हे सख्यः !, मत्कृते चित्रपट्टकम् ॥१८०॥ चेट्यः कथंचिदानीय, कुमार्यास्तमदर्शयन् । साऽथ चित्रं समालोक्य, श्रेणिकायौत्सुकायत॥१८१॥ दासीमुखाच्च तत् ज्ञात्वा, वणिगप्येवमभ्यधात् । श्रेणिकं दिवसेऽमुष्मिनानेष्यामि सुरंगया ॥१८२॥ संकेतमिति संज्ञाप्य, सुरंगां च विधाय सः । एत्य राजगृहं शीघ्रं, श्रेणिकाय शशंस तत् ॥ १८३॥ सोऽथ नागसुतैः सर्व्वैः, रथस्थः सरथैः समम् । तमिश्रायां गर्जांसस्थश्चक्रीवागात् सुरंगया ॥१८४॥ तं च भूनिर्गतं वीक्ष्य, सुरूपमसुरेंद्रवत् । सुज्येष्ठा चित्रसादृश्यादुपलक्ष्याभ्यमोदत ॥१८५॥ श्रेणिकः स्माह सुज्येष्ठे !, क्षिप्रमारोह यद्रथम् । आरूढा हृदि पूर्वं तु, चित्रदृष्टाऽपि मानिनि ! ॥१८६॥ सुज्येष्ठां चेलणा प्रोचे, स्वसुः स्नेहात् त्वया समम् । समेष्यामि ततः सोचे, त्वमप्यारोह राड्रथम् ॥१८७॥ तथैव कृतवत्येषा, सुज्येज्येष्ठेऽंतर्गृहस्य तु । विस्मृतां च समानेतुमगाद्रत्नकरंडिकाम्॥१८८॥ अथैवमभ्यधुर्नत्वा, नृपतिं नागनंदनाः । न स्थातुमुचितं नाथ !, सुचिरं वैरिवेश्मनि ॥१८९॥ ततोऽसौ प्रेरयामास, रथ्यानाशु सुरंगया । तत्रायाताऽथ सुज्येष्ठा, विवेद नृपतिं गतम् ॥१९०॥ वीक्षापन्नाऽथ पूच्चक्रे, सा यथा ह्रियते छलात् । चेल्लणा श्रेणिकेनैषा, व्याघ्रेणैव वरार्थिनी ॥१९१॥ ॥१०॥
संनह्यंतं निवार्याथ, चेटकं तस्य सैन्यराट् । वीरांगकोऽन्वधाविष्ठ, श्रेणिकं रथमास्थितः ॥१९२॥ क्षणाच्च मिलितो वीरोऽधिज्यीकृतशरासनः । द्वात्रिंशत्सुलसापुत्रानेकेनापीपुणाऽवधीत् ॥१९३॥ यावद् वीरांगको रथ्यान्, रथांश्चापाकरोत्पथः। तावद्राजा ययौ दूरं,

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

रथेनासह्यरंहसा ॥१९४॥ ततोऽसावर्धसिद्धार्थः, सेनानीर्विनिवृत्तवान्। भगिनीविप्रलब्धा तु, सुज्येष्ठैवं व्यचिंतयत् ॥१९५॥ धि-
ग्धिग्विषयवांछेयं,विषयाह्यति(यास्त्रि)विषा यतः। आदिमध्यावसानेषु,न कुत्रापि सुखावहाः॥१९६॥ उपभुक्तं सकृद्धन्याद्विषं हि विषयाः
पुनः। चिंतिता अपि जीवानां, हन्युर्जन्मशतान्यपि ॥१९७॥ औत्सुक्यं प्रथमं कुर्युर्मध्ये दीप्तादिकान् रसान्। अंते बीभत्सलज्जादीन्,
स्वास्थ्यं त्वेते कदापि न॥१९८॥ शब्दादिविषयासक्तो,जनः स्वार्थैकतत्परः। विश्वस्तं वत्सलं चापि, हन्यान् मां चेल्लणा यथा॥१९९॥
तदलं दुःखदैरेभिः, परायत्तैर्विनश्वरैः। स्वाधीनं सुस्थिरं धर्म्मं, ग्रहीष्यामि सुखास्पदम्॥२००॥ सुज्येष्ठा भावयित्वैवं,चंदनार्यापदां-
तिके। प्रव्रज्यां शिवसाम्राज्यदायिकामाददे सुधीः॥२०१॥–श्रेणिकोऽपि व्रजन्मार्गे,सादृश्याच्चेल्लणां प्रति। सुज्येष्ठे! वद धीश्रेष्ठे,भाषते
स मुहुर्मुहुः ॥२०२॥ साऽप्यवोचदहं स्वामिन्!, सुज्येष्ठायाः कनीयसी। चेल्लणेत्यथ सोऽप्यूचे, खंडस्थाने सिताऽभवत् ॥२०३॥
श्रेणिकः स्वपुरं गत्वा, तामुद्वाह्य प्रमोदतः। पट्टराज्ञीपदेऽकार्षीद्, दमयंतीं नलो यथा॥२०४॥ अथाभयकुमारेण,सहितः श्रेणिको
नृपः। सुलसानागयोर्गेहे, ययौ तद्बोधनेच्छया ॥२०५॥ तौ तु स्वसुतवृत्तांतं, ज्ञात्वाऽऽक्रंदनतत्परौ। अभयेन बभाषाते, भारत्या-
ऽतिगभीरया ॥२०६॥ भो भो विश्वस्थितिर्ह्येषा,यद् जातस्य ध्रुवं मृतिः। तद् विश्वविदितेऽत्रार्थे,किं शोकेन विवेकिनाम्? ॥२०७॥
आकीटादासुरेन्द्राच्च,कृतांतस्य न कोऽप्यलम्। ततः किं क्रियते शोकः, स यत् स्वार्थविनाशकः ॥२०८॥ जलाग्निव्यालचौरारि-
रुजाद्यार्त्तेऽपि भूतले। यद् जीव्यते तदाश्चर्यं,निमेषमपि मानवैः ॥२०९॥ किंच यैः कर्म्मभिर्मृत्योरवस्कंदः पतेत् क्षणात्। यतितव्यं
तदुच्छित्त्यै, नतु शोच्यं विवेकिभिः ॥२१०॥ नागस्य सुलसायाश्च, कृत्वा संभाषणमिति। अभयः श्रेणिकश्चापि, निजं धाम समे-
यतुः॥२११॥ यथेष्टं श्रेणिकेनाथ, धारिणीप्रमुखास्ततः। बहूव्योऽपि हि सुरूपिण्यः, परिणिन्ये नृपात्मजाः॥२१२॥ अदाच्च चेल्लणा- ॥११॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

देव्याः, एकस्तंभविभूषितम्। दिव्योद्यानपरिक्षिप्तं, प्रासादं देवनिर्मितम् ॥२१३॥ ततोऽसौ बुभुजे भोगांस्तत्रस्थः सममेतया। वर्यान्
वरविमानस्थः, पुलोम्येव पुरंदरः ॥२१४॥ सोऽथ श्येनकजीवस्तु, व्यंतरत्वात् परिच्युतः। उदरे चेल्लणादेव्याः, पुत्रत्वेनोदपद्यत
॥२१५॥ निदानवशतस्तस्मिन्, गर्भे वृद्धिमुपेयुषि। पतिमांसादने देव्या, दोहदः समजायत ॥२१६॥ न शशाक समाख्यातुं, देवी
कस्यापि तं पुनः। अपूर्णदौहदत्वेन, क्षीयते च क्षणे क्षणे ॥२१७॥ दृष्ट्वा कृशांगीं तां देवीं, प्रपच्छ श्रेणिकोऽन्यदा। क्षीयसे देवि!
देहेनान्वहं क्षयरुजेव किम्? ॥२१८॥ मुमोचाश्रूणि साऽजस्रं, प्रत्यूचे नतु किंचन। ततो राज्ञा सनिर्बंधं, पृष्टा सा दोहदं जगौ
॥२१९॥राजाऽऽख्यादभयायैतत्, सोऽपि तं तमसि न्यघात्। तदुपर्यन्यमांसं च, राज्ञीं तत्रानयत्ततः॥२२०॥ नृपस्याक्रोशतस्तस्याः,
पश्यंत्या अभयस्ततः। अदात् तत्पिशितं छित्त्वा, छित्त्वा दोहदपूर्त्तये॥२२१॥ मन्यमाना महामांसमश्नंती चेल्लणाऽप्यथ। ध्यायंती
मुमुदे गर्भं, विषसाद नृपं पुनः॥२२२॥ संपूर्णदोहदा सा तु, पतिभक्ताऽप्यचिंतयत्। दोहदाल्लक्ष्यते गर्भो,नूनमेष पितुर्दुहृद् ॥२२३॥
तदलं जीवितेनास्य, ततस्तीव्रागदान् पपौ। नापप्तच्चैरसौ किंतु, पापात्मा ववृधेऽधिकम् ॥२२४॥ कालेन सुषुवे सूनुं, तं चेट्याऽत्या-
जयच्च सा। अशोकवनिकां गत्वा, तं साऽशोकतलेऽत्यजत् ॥२२५॥ प्रत्यायांतीं नृपो वीक्ष्य, कुत्रागा इत्युवाच ताम्। साऽवोचच्चे-
ल्लणादेव्याः, सुतं त्यक्तुमगामहम्॥२२६॥ राजाऽथ तत्र गत्वा तं,दृष्ट्वा चंद्रमिवोद्उज्ज्वलम्। पाणिभ्यां पुत्रमादाय,गत्वा देव्यंतिकेऽ-
वदत्॥२२७॥ किमकार्षीः प्रिये! पापं, निष्ठुरं? सुकुलोद्भवे!। न कुंडं गोकुलं चापि,व्युत्सृजंत्यात्मजं स्त्रियः॥२२८॥ त्यक्ष्यस्याद्य-
मपत्यं चेत्, स्थेयांस्यन्यानि तन्न ते। तर्जयित्वेति तां राजा, स्वयं पुत्रमवर्धयत् ॥२२९॥ तस्य चैकांगुली छिन्ना, तदाऽशोक-
तरोस्तले। कुक्कुटेन तदर्त्याऽसावरोदीत् सकलां निशाम्॥२३०॥ पूयलिप्तां ततो राजा,मुखेऽक्षैप्सीत् तदंगुलीम्। मनाक् सुखासिकां

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

लेभे, दारकोऽपि मुखोद्भवाम् ॥२३१॥ अशोकचंद्र इत्याख्यामदात्तस्मै नृपो मुदा। व्यधुः कूणांगुलित्वेन, कूणिकाख्यां तु बालकाः
॥२३२॥ ततोऽष्टवार्षिकं स्नेहात्, कुमारं कूणिकं नृपः। अध्यापयत् कलाचार्याल्लिप्याद्याः सकलाः कलाः॥२३३॥ अथान्यौ चेल्ल-
णादेव्याः, पुण्यवंतौ दिवश्च्युतौ। सुतौ हल्लविहल्लाख्यौ, जज्ञाते गुणशालिनौ ॥२३४॥ कल्पवर्त्तकृते गौडमोदकान् कूणिकाय सा।
पुनर्हल्लविहल्लाभ्यां, प्राहिणोत् खंडमोदकान् ॥२३५॥ प्राग्जन्ममत्सरावेशविवशः कूणिको हृदः। तातः कारयते सर्वमिति दध्यौ
विमूढधीः ॥२३६॥ संप्राप्तयौवनं तं च, महर्द्ध्या पर्यणाययत्। पद्मावत्यभिधां कन्यां, पद्माक्षीं नृपनंदनाम् ॥२३७॥ अन्यासामपि
राज्ञीनां, श्रेणिकस्य महीपतेः। राज्यश्रीवासवेश्मानि, सूनवो बहवोऽभवन् ॥२३८॥–इतश्च श्रीमहावीरः, सर्वज्ञश्चरमो जिनः। सुरासुरनरैः
सेव्यः, सर्वातिशयसंयुतः ॥२३९॥ सहितः साधुसिंहानां, चतुर्दशसहस्रकैः। षट्त्रिंशद्भिश्च साध्वीनां, सहस्रैः परिवारितः॥२४०॥
मज्जन्मुग्धं भवांभोधावुद्दिधीर्षुरिदं जगत्। ग्रामाकरपुराकीर्णां, विहरन्नन्यदा महीम् ॥२४१॥ वहिस्तन्नगरात्तुंगे, गिरौ वैभारनामनि।
चैत्ये गुणशीलाभिख्ये, भगवान् समवासरत्॥२४२॥ चतुर्भिः कलापकं ॥ ज्ञात्वा श्रीवीरमायातं, तं नंतुं त्रिजगत्पतिम्। श्रेणिकः
सपरीवारो, जगाम जगतीपतिः ॥२४३॥ विधिवत्तत्र वंदित्वा, यथास्थानमुपाविशत्। ततो भव्यावबोधाय, जगादैवं जगद्गुरुः
॥२४४॥ भो भो दुःखी भवारण्ये, पुण्यपाथेयवर्जितः। पांथवत् सत्पथः भ्रष्टो, बंभ्रमीत्यसुमांश्चिरम् ॥२४५॥ श्वभ्रेषु सहतेऽदभ्राः,
कुंभीपाकादिका व्यथाः। तिर्यक्षु च्छेदवेधांकदाहदोहादिकाः पुनः ॥२४६॥ मनुष्येषु तु दौर्गत्यरोगशोकभयादिकाः। देवेष्वपि
विषादेर्ष्यावियोगच्यवनादिकाः ॥२४७॥ सहतेऽत्र भवाटव्यां, जीवो दुःखपरंपराम्। अनंतान् पुद्गलावर्त्तान्निर्धर्म्मोऽटाट्यते पुनः
॥२४८॥ जैनो धर्म्मस्तदुच्छेत्ता, दाता स्वःशिवसंपदाम्। आत्मनीना जना ह्येमं, श्रयध्वं शक्तितस्ततः ॥२४९॥ श्रुत्वैनां देशनां ॥१३॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

भर्त्तुर्भूपः सम्यक्त्वमाश्रयत्। अभयाद्याः पुनर्देशविरतिं प्रतिपेदिरे ॥२५०॥ नत्वा वीरं जगज्ज्येष्ठं, गुणश्रेष्ठान्मुनीनपि। आजगाम निजं धाम, श्रेणिकः सपरिच्छदः॥२५१॥ ज्ञानादित्यस्ततः स्थानाद्व्यहार्षीद् भगवानपि। भव्यपद्मप्रबोधाय, ग्रामाकरपुरादिषु॥२५२॥ सम्यग्दर्शनपूतात्मा, नृपतिः श्रेणिकोऽन्वहम्। त्रिसंध्यं पूजयामास, प्रतिमामार्हतीं मुदा ॥२५३॥ कारयित्वाऽथ सौवर्णान्, यवानष्टोत्तरं शतम्। स्वस्तिकं रचयामास, प्रत्यहं तत्पुरः स्वयम् ॥२५४॥–इतश्च पोतनपुरोद्याने नाम्नि मनोरमे। भगवान् समवासार्षीद्, वीरो विश्वैकवत्सलः ॥२५५॥ सोमचंद्रात्मजं तत्राग्रजं वल्कलचीरिणः। प्रसन्नचंद्रं प्रव्राज्य, जिनो राजगृहं ययौ ॥२५६॥ ततो नियुक्तकैः पुंभिः, द्रुतमेत्य नृपांतिकम्। अंतकातंकमुक्तस्य, वीरस्यागमनं जगे॥२५७॥ जिनागमनमाकर्ण्य, केकीवांभोधरध्वनिम्। मुमुदे मेदिनीनाथः, श्रेणिकः शासनार्चकः॥२५८॥ ससंभ्रममथोत्थाय, रत्नसिंहासनान्नृपः। विमुच्य पादुके पद्भ्यामुत्तरासंगमादधे ॥२५९॥ गत्वा पदानि सप्ताष्टौ, जिनसंमुखमंजसा। पुरःस्थमिव तत्रस्थे, स्वमूर्ध्ना प्रणिपत्य तम्॥२६०॥ शरीरांतरसम्मांतमिव हर्षं बहिस्तनौ। बिभ्राणः पुलकव्याजात्तुष्टावेति महीपतिः ॥२६१॥ स्वयंभुवे महेशायाच्युताय परमात्मने। प्रद्योतनाय बुद्धाय, श्रीवीरायार्हते नमः॥२६२॥ वंदित्वेति जिनाधीशं, मगधेशो महामनाः। सिंहासनमथास्थायादिक्षत् कौटुंबिकानिति॥२६३॥ सबाह्याभ्यंतरं सर्वं, भो भो राजगृहं पुरम्। श्रीखंडघुसृणांभोभिः, प्रशांतीकृतभूतलम् ॥२६४॥ दशार्धवर्णपुष्पैश्च, सर्व्वत्र प्रकरीकृतम्। वैजयंतीयुतकेतुध्वजराजिविराजितम् ॥२६५॥ ऊर्ध्वीकृतोच्चमाणिक्यतोरणश्रेणिसुंदरम्। प्रासादद्वाःस्थमांगल्यकलशालिसमाकुलम्॥२६६॥ विचित्रोल्लोचसच्छोभं, सच्छोभमौक्तिकांकितम्। चित्रकं त्वग्दुकूलाद्यैः, शोभितं हट्टशोभया॥२६७॥ सुगंधधूपधूम्याभिर्घनोन्नतिविडंबकम्। स्थाने स्थाने समारब्धदिव्यसंगीतकान्वितम् ॥२६८॥ कुरुध्वं कारयध्वं च, सर्वमेतद् विशेषतः।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

येन स्वस्य परस्यापि, भवभेत्री प्रभावना ॥२६९॥ षड्भिः कुलकं । इत्याज्ञां नृपतेस्तेऽपि, प्रतिपद्य मुदा क्षणात् । तत्सर्वं साधयामासुः, सुरेन्द्रस्येवाभियोगिकाः ॥२७०॥ राजा स्नातानुलिप्तोऽथ, कृतकौतुकमंगलः । संवीतदिव्यवासस्को, दिव्याभरणभूषितः ॥२७१॥ बंदिवृंदजयारावेष्वतुच्छेषूच्छलत्सु च । आरुरोह ततो गंधसिंधुरस्कंधमुद्धुरम् ॥२७२॥ युग्मं । मूर्ध्नि श्वेतातपत्रेण, ध्रियमाणेन भूपतिः । राजन् चूलास्थचैत्येन, सुमेरुरिव जंगमः ॥२७३॥ निशाकरकराकारैर्वीज्यमानश्च चामरैः । स्वपतत्सिंधुगंगायुग्हिमाद्रेरिव रूपभृत् ।२७४॥ दिव्ययानाधिरूढाभिर्दिव्यालंकारचारुभिः । देवीभिरिव रम्याभिर्देवीभिः परिवारितः ॥२७५॥ महाराजघटाघंटाटंकारैर्गर्जगर्जितैः । नांदीतूर्यनिनादैश्च, पूरितांबरकंदरः ॥२७६॥ वल्गत्तुरंगसंघातैर्हेषानिर्घोषसंकुलैः । अर्काश्वस्पर्धयेवोच्चैरुत्पतद्भिर्वृतो भृशम्॥२७७॥ किंकिणीकंकणक्वाणै, रथानां केतुहस्तकैः। अनेकमूर्त्या नृत्यंत्या, कीर्त्तिनट्येव शोभितः॥२७८॥ पदातिभिर्महायोधैर्विविधायुधपाणिभिः। राजमानः पराजय्यैर्जयश्रीस्तंभसन्निभैः ॥२७९॥ एवं समग्रसामग्र्या, सर्व्वद्युत्याऽखिलश्रिया । भक्तिसारो जिनं नंतुं, भंभासारोऽचलन्नृपः ॥२८०॥ धन्योऽयमेनं यत् सर्व्वाः, शिश्रियुः सर्व्वतः श्रियः । श्रेयांस्यनेन लब्धानि, रोचतेऽस्मै यतो जिनः॥२८१॥ अस्मात्प्रभावको नान्यः, कीर्त्तिश्चास्य सुधोज्ज्वला । अस्मिन्नेवेदृशी भक्तिर्दृश्यते शासनं प्रति ॥२८२॥ एवं प्रशंसतां बोधिहेतुतां प्राणिनां व्रजन् । निर्ययौ मध्यमध्येन, राजा राजगृहस्य तु॥२८३॥ चतुर्भिः कलापकं । अथ प्रसन्नचंद्रर्षिश्चिकीर्षुः कर्म्मणः क्षयम् । पृथुपृथ्वीशिलापृष्ठे, वैभारोपत्यकास्थिते ॥२८४॥ उत्क्षिप्तैकक्रमः सूर्याभिमुखश्च भुजद्वयः । समाहितमनास्तस्थौ, कायोत्सर्गेण निश्चलः ॥२८५॥ युग्मं ॥ नृपस्तेनाध्वना गच्छन्नादित्यातपतापतः । सर्वांगप्रक्षरत्स्वेदं, सनिर्झरमिवाचलम् ॥२८६॥ एकपादस्थितं स्थेष्टमेकपादमिवांघ्रिपम् । स्वर्गापवर्गमाक्रष्टुमिवोत्क्षिप्तभुजद्वयम् ॥२८७॥ दृग्युद्धमिव तन्वानं, पश्यंतं

For Private and Personal Use Only

सूर्यमंडलम्। प्रसन्नचंद्रराजर्षि, वीक्ष्योपालक्षयन्नृपः ॥२८८॥ त्रिभिर्विशेषकं। उत्तीर्य हस्तिनः स्कंधात्तं नत्वा भक्तिनिर्भरः। शिरो धुन्वन् जगामाग्रे, तद्गुणग्रामरंजितः ॥२८९॥ दृष्ट्वा चंद्रमिवांभोधिश्छत्रादीन् श्रीमदर्हतः। उल्ललास भृशं राजा, श्रेणिकः परमार्हतः ॥२९०॥ नृराजो राजचिह्नानि, पंचाप्येतान्यथामुचत्। वाहनं मुकुटं छत्रं, कृपाणं चामरे अपि॥२९१॥ ततः समवसृत्यंतः, प्रविश्य जिननायकम्। तिस्रः प्रदक्षिणाः कृत्वा, वंदित्वा चास्तवीदिति ॥२९२॥ श्रद्धया वर्धमानोऽपि,वर्धमानजिनेश्वर!। त्वदाज्ञामुपमातीतां,कथंकारमहे स्तुवे ?॥२९३॥ कल्पद्रुमाद्यतिक्रांता,त्वदाज्ञा देव! देहिनाम्। प्रसूते या फलैर्नित्यमिहामुत्राप्यचिंतितैः॥२९४॥ शारीरमानसासंख्यदुःखलक्षक्षयंकरी। कथं सुधासदृक्षा स्यात्त्वदाज्ञा शिवसौख्यदा ?॥२९५॥ सदोद्योता गतस्नेहा,निश्चला च निरंजना। त्वदाज्ञा जगतामीश!, नव्यदीपायते नृणाम्॥२९६॥ नयसप्तशतीचक्रा,निःशल्या चैककाष्ठिका। त्वदाज्ञा दुर्गमोक्षाध्वन्यपूर्वस्यंदनायते॥२९७॥ त्वदाज्ञैकावली चेयं, ज्ञानादिवररत्निका। हृत्स्थयाऽपि यया जीवाः, निर्ग्रंथाः स्युस्तदद्भुतम्॥२९८॥ कर्म्मारिवीर श्रीवीर, त्वदाज्ञां ये तु कुर्वते। त्रिलोक्यपि करोत्याज्ञां, तेषां सौभाग्यशालिनाम् ॥२९९॥ देवाधिदेव देवेन्द्रवृंदवंद्यपदद्वय!। त्वदाज्ञा हृदि मे नित्यमस्तु मेरुरिव स्थिरा ॥३००॥ स्तुत्वेति विरते राज्ञि, विदधे विरताग्रणीः। देशनां भव्यजंतूनां, निष्कर्म्मा कर्म्मनाशनीम् ॥३०१॥ अनंतज्ञानदर्शनवीर्यानंदमयोऽप्ययम्। अनादिकर्म्मसंयोगाद्, दुःखी भ्रांतश्चिरं भवी ॥३०२॥ ज्ञानादित्रयसंयोगाद्, वियोगो ह्यनयोर्भवेत्। स्वर्णाश्मनोर्यथाऽनादियुक्तयोर्वह्नियोगतः॥३०३॥ तदिदानीमवेत्यैवं, श्रयध्वं तत्रयं जनाः!। लभध्वं शाश्वतं तस्मात्, तदनंतचतुष्टयम् ॥३०४॥ चमत्कृतः स्वचित्तेन, प्रभोर्देशनयाऽनया। भगवंतमथो नत्वा, पप्रच्छ श्रेणिको नृपः ॥३०५॥ यदा प्रसन्नचंद्रर्षिः, ववंदे मयका तदा। कालं कुर्यात्ततः कां स, गतिमासादयेद् विभो! ॥३०६॥ स्वाम्यूचे सप्तमीं

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

पृथ्वीं,यायाद् दध्यौ ततो नृपः। अत्युत्कृष्टतपस्कस्याप्यस्य केयं गतिर्मुनेः?॥३०७॥ क्षणं स्थित्वा पुनः पृष्टे,नृपेण प्रभुरभ्यधात्। याति सर्वार्थसिद्धिं स, विपद्येताधुना यदि ॥३०८॥ विस्मितो नृपतिर्नत्वा, पुनः पप्रच्छ सादरम्। स्वामिन्! आख्याहि को हेतुः,यदियं व्याकृतिर्द्विधा ?॥३०९॥ स्वाम्याख्यत्तव सैन्यस्याग्रस्थौ सुमुखदुर्मुखौ। मर्त्यौ तमृषिमैक्षेतां, तत्रेदं सुमुखोऽभ्यधात् ॥३१०॥ क्रमेणैकेन कस्तिष्ठेत् ?, कश्चैक्षेतार्कमंडलम् ?। क्षणार्हमपि तेनायमहो दुष्करकारकः ॥३११॥ दुर्मुखोऽथ स्वभावेन, दुर्मुखः सुमुखं जगौ। राजा प्रसन्नचंद्रोऽयमद्रष्टव्यमुखः खलु ॥३१२॥ प्रविव्रजिषुणा येन, स्वराज्ये योजितः शिशुः। महनसि नृशंसेन, न्यासितस्तर्णको यथा ॥३१३॥ स्वराज्याच्च्यावितोऽमात्यैः, वातैरिव नगाच्छदम्। विद्ध्वंसेऽवरोधश्च, शून्यं दुग्धमिवौतुभिः॥३१४॥ इत्याकर्ण्य स राजर्षिः, स्वपुत्रस्य पराभवम्। देध्मीयमानः क्रोधेन, दध्यौ मोहबलार्दितः॥३१५॥ धीसखानधमान् धिग् धिक्, कृतघ्नान् सुदुराशयान्। पराबभूवे यैर्बालो, दुर्बलो बालिशैर्मम॥३१६॥ ध्यायन्नेवं भृशं साक्षादिव वीक्षांबभूव तान्। मनसैव हि संनह्य, युयुधे संयतीव तैः॥३१७॥ हन्यमाने त्वमानौघे, कुंताकुंति शराशरि। त्वमागास्तत्र तं नंतुं,स्तुत्वाऽगात् पुरतः परम्॥३१८॥ न चाज्ञायि तदा तेन,त्वमायातोऽपि भूपते!। चेतनस्य हि चैतन्यमनु चित्तं महाचलम् ॥३१९॥ शरारुः कृष्णलेश्यावान्, रौद्रध्यानपरश्च सः। महातमःप्रभायोग्यस्तदाऽवार्तिष्ट दुष्टधीः ॥३२०॥ त्वयि नत्वाऽऽगते त्वत्र,युध्यमानस्तथैव सः। मनसैव बहून् हत्वा,निष्ठितास्त्रोऽभवत् क्षणात्॥३२१॥ शेषान्निहंतुमावेशात्,शिरस्कायाक्षिपत्करम्। अशिरोजं स्पृशन् शीर्षमस्मार्षीत् स पुनर्व्रतम्॥३२२॥ निंदित्वा बहुधाऽऽत्मानं,स्थापयित्वा पुनर्व्रते। महामोहादिदंभोलिं,धर्मध्यानं दधार सः॥३२३॥ तेन सर्व्वार्थसिद्धार्हः,सोऽभूत् तस्यामथो दिशि। दृष्ट्वाराद् सुरसंपातं, प्रपच्छ किमिदं ? प्रभो! ॥३२४॥ प्रभुः प्राह समुत्पेदेऽमुष्य संप्रति केवलम्। ततोऽस्य केवलज्ञानमहिमानं व्यधुः सुरा

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

॥३२५॥ राजा राजर्षिवृत्तांतैर्नितरां रंजितो जगौ। भगवन्! केवलज्ञानं,कस्मिन् व्युच्छेदमेष्यति ?॥३२६॥ विद्युन्माली तदा देवश्चतु-
र्देवीसमावृतः। आयातोऽस्ति जिनं नंतुं,महर्द्धिर्ब्रह्मलोकतः॥३२७॥ देवोऽयं चरमो भावी,केवलीति जिनोदिते। राज्ञोचे केवलज्ञानं,कथं
देवेषु जायते ?॥३२८॥ भगवानभ्यधादेष,सप्तमेऽह्नि दिवश्च्युतः। त्वत्पुरे भविता पुत्रो,धारिण्यृषभदत्तयोः॥३२९॥जंबूकुमार इत्या-
ख्यो,भावी चरमकेवली। नृपोऽपृच्छत् पुनः कस्माद्,द्युतिमांश्च्यवनेऽप्ययम्?॥३३०॥ जगाद भगवानस्य, भवदेवादिकान् भवान्।
शिवजन्मतपोलक्ष्म्या,कांतिस्तेनेदृशी शुभा॥३३१॥–अत्रांतरे गलत्कुष्ठी,कश्चिन्नत्वा जिनांतिके। निषद्य स्वांगपूयेन,लिलेप भगवत्क्रमौ
॥३३२॥ तं दृष्ट्वा श्रेणिको दध्यौ, हन्म्येनं पापकारिणम्। यद्वा न युक्तमत्रेदं, हनिष्याम्यत उत्थितम्॥३३३॥ वीरेणाथ क्षुते तेन,
कुष्ठिनोचे म्रियस्व भोः। राज्ञा तु जीव जीव्यास्त्वं, मृषीष्ठा वाऽभयेन तु ॥३३४॥ कालसौकरिकेणाथो, मा जीवीर्मा म्रियस्व
वा। श्रुत्वा स्वामिन् म्रियस्वेति, चुकोप श्रेणिकोऽधिकम्॥३३५॥ भटान् भ्रूसंज्ञयाऽऽदिक्षल्लातैनं निर्गतं बहिः। जगद्बंधोर्जिनस्यैवं,
यः पराशातनापरः ॥३३६॥ अथ कुष्ठी जिनं नत्वा, चचाल लुलितालकः। योधास्तमन्वधावंत, सावधाना उदायुधाः ॥३३७॥
देवरूपमयं कृत्वोत्पपात गगनाध्वना। सत्रपाः पत्तयस्तेऽपि, व्यावृत्त्याख्यन्नृपाय तत् ॥३३८॥ किमेतदिति संभ्रांतः, प्रणिपत्य
महीपतिः। प्रभुं पप्रच्छ विश्वेश!, कुष्ठी कोऽसौ? निवेद्यताम् ॥३३९॥ भगवानप्युवाचैवं, वत्सदेशेऽस्ति पूर्वरा। कौशांबीति नृप-
स्तस्यां, शतानीको महाबलः ॥३४०॥ तत्र सेडुबको नाम, द्विजो दारिद्र्यविद्रुतः। सोऽन्तर्वत्न्याऽन्यदा पत्न्या, प्रोचेऽर्पय घृता-
दिकम् ॥३४१॥ तेनोचे नास्ति मे किंचित्, तद्विज्ञानं वचस्विनि!। येनानुरंजितो दद्याद्दाता घृतगुडादिकम्॥३४२॥ तयोक्तं भज
राजानं, स दद्याद्येन संपदम्। सिषेवे स ततो भूपं, नित्यं पुष्पफलादिभिः ॥३४३॥ जगदे सोऽन्यदा राज्ञा, किं ते विप्र! प्रदी-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

यताम् ?। प्रार्थयिष्ये प्रियां पृष्ट्वेत्याख्याद् विप्रोऽपि पार्थिवम् ॥३४४॥ ततोऽसौ स्वगृहे गत्वेत्यूचे मेऽद्य महीपतिः। परितुष्टः प्रदत्ते तत्, कमर्थं प्रार्थये प्रिये !॥३४५॥ सा प्राहाग्रासने भुक्तिं, दीनारं दक्षिणाकृते। याचस्व भूपतिं भद्रोत्सारकं च दिने दिने ॥३४६॥ गत्वा तद्याचितं तेन, राज्ञाऽपि तत् प्रतिश्रुतम्। उदंकः पतितोऽप्यब्धौ, बिभर्त्ति स्वोचितं जलम् ॥३४७॥ प्रत्यहं तस्य तत्सर्वं, कुर्वंतं वीक्ष्य भूपतिम्। सामंताद्यास्ततो दध्युः, पूज्योऽयं राजवल्लभः॥३४८॥ ततोऽभोज्यत तैर्भीतैर्दक्षिणां ग्राह्यते स्म सः। वांत्वा वांत्वा द्विजो लोभादबोभोजीद् गृहे गृहे ॥३४९॥ ववृधे स्वल्पकालेन, ततः सेडुबको द्विजः। ऋद्ध्या महत्या पुत्रादिसंतत्या च प्रभूतया ॥३५०॥ रसेषूर्ध्वमथो यात्सु, तस्याजायत कुष्ठरुक्। दुःसाध्योऽभूच्च स व्याधिर्वैरीवोपेक्षितः क्रमात् ॥३५१॥ शतानीकस्य भूपस्य, तथैवाग्रासनासिनम्। तं गलत्कुष्ठिनं वीक्ष्यामात्या भूपं व्यजिज्ञपन् ॥३५२॥ स्वामिन्नस्य पदे कोऽपि, पुत्रादिः स्थाप्यतां ननु। संक्रांतिर्जायते व्याधेर्येनैकत्रासनादिना ॥३५३॥ एवमस्त्विति राज्ञोक्ते, विप्रः प्रोक्तः स मंत्रिभिः। भोक्ष्यतेऽत्र सुतस्ते तु, तिष्ठेस्त्वं स्वीयवेश्मनि ॥३५४॥ रोगेऽतिप्रसृते तस्य, तत्पुत्रैस्त्रपया ततः। कृत्वा कुटीरकं गेहाद्, बहिस्तत्र स आस्यत ॥३५५॥ तस्य तत्र स्थितस्यादुर्वारं वारेण तत्स्नुषाः। दारुपात्रे सुदूरस्थाः, श्वपाकस्येव भोजनम् ॥३५६॥ सोऽथ दध्यौ सुतादीनां, कुपितोऽवज्ञया तया। मत्तः श्रियैव मत्तानां, दर्शयाम्यथ तत्फलम् ॥३५७॥ ध्यात्वेत्यूचे स तान् मोक्ष्ये, प्राणान् किंतु मुमुर्षुणा। मंत्रपूतः पशुर्देयः, स्वेभ्य एष कुलक्रमः ॥३५८॥ मुदितैस्तैः पशुः क्षिप्रं, तस्यार्प्यत ततोऽङ्गकात्। उद्वर्त्योद्वर्त्य तद्भक्ष्ये, चिक्षेपोद्वर्त्तनीर्द्विजः ॥३५९॥ तद्भक्षणादसौ जज्ञेऽचिरेणाजोऽपि कुष्ठिकः। हत्वा तमन्यदा सोऽदात्, स्वेभ्यस्तं तेऽप्यभुंजत ॥३६०॥ तीर्थे स्वार्थाय गच्छामीत्यापृच्छ्य तनयानसौ। शरण्यमिव मन्वानोऽरण्यानीमुन्मुखोऽगमत् ॥३६१॥ भ्राम्यन्नुदन्ययाऽपश्यन्नदं नानाद्रुमैर्वृतम्।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

पत्रादिपाकसंपर्कात्, क्राथवत्तत्पयः पपौ॥३६२॥ तृषार्त्तो वैद्यवाचेव,सोऽपादंभो यथा यथा। तथा तथा विरेकोऽभूदस्योग्रकृमिभिः
समम्॥३६३॥ स नीरुक् तेन संवृत्तो, व्यावृत्त्यागात् पुरीं निजाम्। पौरैः पृष्टोऽब्रवीच्चाहं,नीरुक् देवतया कृतः॥३६४॥ गृहे गतः
स्वपुत्रादीन्, मक्षिकाकोटिवेष्टितान्। निकृष्टकुष्ठनष्टांगान्,दृष्ट्वाऽभाषिष्ट दुष्टधीः॥३६५॥ पापिष्ठाः सुष्ठु दृष्टं भो,मदवज्ञा फलेग्रहिः।
फलमेतत् ततः पुत्रास्तमूचुः किं त्वया कृतम्?॥३६६॥ स स्माहान्यस्य कस्येदृक्,शक्तिस्तस्मै ततोऽशपत्। लोकः सर्वोऽपि सोऽथागाद्,
राजन्नत्र पुरे क्रमात्॥३६७॥ वृत्तिं द्वारं स शिश्राय, द्वारपालं निराश्रयः। द्वाःस्थोऽथागात् ममानंतुं,कृत्वा तु द्वाररक्षकम्॥३६८॥
द्वारस्थो द्वारदुर्ग्गाणां, बलिः सेडुबकोऽधिकम्। चखाद ग्रीष्मसंतापात्,तृषा तस्याभवद् भृशम्॥३६९॥ द्वारपालभयाद् द्वारं, नात्याक्षीत् तृषितोऽप्यसौ। धन्यान् वारिचरान् जीवान्, मन्यमानो व्यपद्यत॥३७०॥ सोऽत्रैव नगरद्वारवाप्यामजनि दर्दुरः। भूयोऽत्र
समवासार्ष्मो, विहरंतोऽन्यदा नृप!॥३७१॥ अस्मदागमनं श्रुत्वा, भेकोऽम्भोहारिणीमुखात्। ऊहापोहं वितन्वानो, जातिस्मरणमाप सः॥३७२॥ अचिंतयत् स भेकः प्राक्, द्वारे द्वाःस्थो विमुच्य माम्। ययौ यं वंदितुं वीरं, स आगाद् भगवानिह॥३७३॥ तं
नत्वा तद्गिरः श्रुत्वा, ग्रहीष्ये जन्मनः फलम्। ततो मां वंदितुं भक्त्योत्प्लुत्योत्प्लुत्य चचाल सः॥३७४॥ पथ्यागच्छंस्त्वदश्वेन, खुरेणाक्रम्य मारितः। दर्दुरांकेषु देवेषु, महर्द्धिस्त्रिदशोऽभवत्॥३७५॥ बिडौजसाऽन्यदा राजन्नाचचक्षे स्वपर्षदि। श्रेणिको नैव
चाल्येत, जिनभक्तेः सुरैरपि॥३७६॥ तदश्रद्धालुस्तत्रागात्,स देवः कुष्ठिरूपभृत्। गोशीर्षेण ममासिंचच्चरणौ रसिका न सा॥३७७॥
राज्ञा पृष्टो म्रियस्वेत्याद्यर्थं प्रभुरथावदत्। अर्हन्मृत्वा शिवं गच्छ, म्रियस्वेति शुभं ह्यदः॥३७८॥ त्वं च जीवन् सुखेनासि, मृतस्तु
नरकं गमी। जीवन् सुखी मृतः स्वर्गं, गमीत्युक्तो द्विधाऽभयः॥३७९॥ कालशौकरिकस्त्वेष, जीवन् पापपरायणः। मृतः श्वभ्रं

For Private and Personal Use Only

गमी तेन, द्विधाऽपि प्रतिषेधितः॥३८०॥ मृतस्त्वं नरके याता, सर्वज्ञोक्तमिदं वचः। आकर्ण्य कर्णकटुकं, बभाषे भूपतिः प्रभुम् ॥३८१॥ भवत्सु विश्वविश्वस्य, शिवतातिषु सत्स्वपि। स्वामिन्नस्वामिकस्येव, कथं मे गतिरीदृशी ? ॥३८२॥ प्रभुः प्राह दृढं बद्धं, पुराऽऽयुर्नरके त्वया। अस्माभिरपि तत्कर्म्म,नान्यथा कर्तुमीश्यते॥३८३॥ किंतु तस्मात् समुद्धृत्य, भाविन्यामर्हतामिह। चतुर्विंशतिकायां त्वं, प्रथमस्तीर्थनायकः ॥३८४॥ पद्मनाभाभिधस्तुल्यो, मानवर्णादिना मम। भावी भवांतकृद्राजन् !, विषादं तेन मा कृथाः ॥३८५॥ युग्मं ॥ श्रुत्वेति श्रुतिपीयूषपूरकल्पं ततोऽभवत्। हर्षप्रकर्षादुत्फुल्लपंकजाक्षः क्षितीश्वरः ॥३८६॥ प्रभुं प्रणम्य भूयोऽपि, पप्रच्छ स्वच्छधीरसौ। उपायः कश्चिदस्तीश !, न यायां येन तां गतिम् ॥३८७॥ स्वाम्यूचे कपिला भिक्षां, साधुभ्यो दाप्यते त्वया। त्याज्यते शौनिकोऽयं चेच्छूना श्वभ्रे गतिर्न ते॥३८८॥ इत्यस्तशंसयो वीरं, प्रणम्य स्वपुरं प्रति। प्राचालीदचलानाथो, राजन् राज्यश्रिया तया॥३८९॥ दर्दुरांकः स देवोऽथ,विशामीशं परीक्षितुम्। सम्यक्त्वं निश्चलं नेति,विचक्रे विक्रियामिमाम्॥३९०॥आनायेन मुनिर्मीनानाकर्षन्नृपतेर्नदात्। तेनादर्शि यथाऽन्यस्य, पृथग् धर्मान्मनो भवेत् ॥३९१॥ नृपस्तु निश्चलो धर्म्मे, तं निवार्य पुरे ययौ। आसन्नप्रसवा साध्वी,पुनर्देवेन दर्शिता॥३९२॥ संगोप्यैनां स्वयं राजाऽरक्षत् शासनलाघवम्। त्रिलोक्याऽपि न चाल्योऽयं, नाकिनेति सुनिश्चितम् ॥३९३॥ प्रत्यक्षीभूय तं प्राह, सुमनाः सुमना इति । शक्रोऽशंसत् सदःस्थोऽनुश्रेणिकं शुद्धदृष्टयः ॥३९४॥ स्थिरभक्तिस्तथैवासि, सम्यक् सर्वज्ञशासने। इत्युक्त्वा गोलकौ हारं, दत्त्वा देवो दिवं ययौ ॥३९५॥ अयमेवार्थः सविशेषो निशीथेऽप्युक्तः, तथाहि–रायगिहे सेणिओ राया, तस्स देविंदो संमं सम्मत्तं पसंसइ, इक्को देवो असद्दहंतो नगरबाहिं सेणियस्स पुरओ चेल्लगरूवेणं अणिमेसे गिण्हइ,तं निवारेइ,पुणो वाहडियसंजइवेसेण पुरओ ठिओ,तं अप्पसारिअं नेऊण उव्वरए पसे(च्चाइ)ऊण धरिया,

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

तच्छेव निकेइया, संजइसव्वपरिकम्माणि करेइ, मा उड्डाहो भविस्सइ, सो य गोमडयसरिसगंधं विउव्वइ, तहावि न विपरिणामइ, देवो तुट्ठो, दिव्वं देविड्ढिं दाइत्ता उववूहइ"त्ति॥ गृहे गत्वा ददौ हारं, चेल्लणायै नृपोऽथ तम्। नंदायै गोलकौ ताभ्यां, निर्ययौ कुंडलांशुकम्॥३९६॥ राजाऽथ कपिलामूचे, साधुस्त्वं प्रतिलंभय। तुभ्यं रामीप्सितं द्रव्यं, निग्रहीष्येऽन्यथा ध्रुवम् ॥३९७॥ साऽवोचद्यदि कुर्व्वीथा, मां सर्वस्वर्णदेहिकाम् । तिलशः खंडयेर्वाऽदः, करिष्ये न कथंचन ॥३९८॥ कालशौकरिकोऽप्येवमुक्तः पशून् न चामुचत् । राज्ञा सोऽक्षेपि साक्षेपं, निर्जलेऽन्धौ जडाशयः ॥३९९॥ तत्र पंचशतीं कृत्वा, सोऽवधीन् मृन्मयान् महान्। रज्जुबद्धघटीवासौ, दिनमेकं ततो धृतः ॥४००॥ द्वितीयेऽह्नि नृपो गत्वा, प्रभुं नत्वा व्यजिज्ञपत् । शूनां स शौनिकः कल्पे, व्यमोचि ? भगवन् ! मया ॥४०१॥ स्वाम्युवाचांतरालस्थः, सोऽवधीन् मनसाऽप्यमून्। अवश्यं भाविनो भावा,न भवंत्यन्यथा नृप! ॥४०२॥ प्रभुं नत्वा स्ववेश्मागादनेकाः शासनोन्नतीः। अकार्षीत् सुचिरं राजा, व्यहार्षीत् प्रभुरन्यतः॥४०३॥ शौनिकेनान्वहं तेन, महपंचशतीं घ्नता। सप्तमपृथिवीयोग्यं, कर्मोपार्जि यदुत्कटम् ॥४०४॥ उपमृत्यु तदायातमसंमादिव संमुखम्। तेन तस्य रुजोऽभूवन् , भूयस्यो युगपत्तनौ॥४०५॥ स सर्वांगीणयाऽऽक्रांतः,क्षुत्तृषाऽऽर्त्तोऽपि पीडया। नाश्नन्नपाच्च दीनास्योऽरारट्यत दिवानिशम् ॥४०६॥हा मातर्म्रियते तात !, हाहेत्यादि सुभैरवम् । आचक्रन्द यथाऽन्येऽपि, श्रुत्वाऽऽक्रंदान् भयार्दिताः॥४०७॥ सोऽथ तूलीसितामाल्यपंचालीवेणुमुख्यजे । रतिं कुत्रापि न प्राप, विषयैः सुंदरैरपि॥४०८॥ तत्पुत्रः सुलसस्तस्य, प्रतिकारं यथा यथा । व्यधादथ व्यथाऽत्यर्थं, वर्धते स्म तथा तथा ॥४०९॥ एतत्तेनातिभीतेन, भाविभद्रेण भाषितम्। अभयस्य स्फुरत्प्रौढमनीषोन्मेषशालिनः ॥४१०॥ अभयोऽप्यभ्यधाद् भद्र !, त्वत्पिता सप्तमावनिम्। यास्यत्यवश्यं तल्लेश्या, पश्य तस्येयमागता ॥४११॥ प्रतीपान्विषया-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

नस्य, कुर्यास्त्वं सुखहेतवे। तथा कृतेऽथ तेनासौ, मनाक् मेने सुखासिकाम् ॥४१२॥ अहो अंहःसमूहस्य, कीदृशं हंत दृश्यते। विजृंभितं भवेऽत्रापि,सुलसो ध्यायतीत्यथ॥४१३॥ कालसौकरिको मृत्वा, सप्तम्यां नरकावनौ। नारकः सोऽप्रतिष्ठानेऽजायतोत्कृष्टदुःखभाक् ॥४१४॥ सुलसश्चान्यदा प्रोचे,स्वजनैर्जीविकाकृते। त्वयाऽधिष्ठीयतां मंक्षु, क्रमायातं पितुः पदम्॥४१५॥ सोऽवादीन् न ग्रहीष्येऽदः, पदमत्युग्रपापकृत्। चक्षुष्मान् जीविताकांक्षी, कोऽपि कूपे पतेत् किमु ?॥४१६॥ मम पित्राऽनुभूतं यद्विस्मृतं तद् द्रुतं ननु। दृष्ट्वैतदपि यत् पापाद्, युष्माभिर्न विरम्यते ॥४१७॥ खाद्यखादकतैवात्र, न पापमिति तेऽभ्यधुः। सुलसः स्माह तन्मृत्योर्बिभीयेत किमात्मभिः?॥४१८॥यथाऽऽत्मनः प्रियाः प्राणास्तथाऽन्यस्य विदन्निति। आत्मनीनो जनो हन्यात्,कथं जीवान् सुखप्रियान्?॥४१९॥ स्वार्थैकनिष्ठास्ते प्रोचुर्यत् स्यात् ते पापमत्र तत्। वयमेव ग्रहीष्यामः, संविभज्य पृथक् पृथक्॥४२०॥ किंचैकमहिषस्कंधं,छिंद्यास्त्वं शितपर्शुना। छेत्स्यामो वयमन्येषां,तत्तेऽंहोऽपि न तादृशम्॥४२१॥ सुलसोऽपि निजान् बोद्धुं, बुद्धिधाम निजक्रमम्। अकुंठेन कुठारेण, निजघान सुनिष्ठुरम्॥४२२॥ क्षणात्तस्य क्षते तत्र,व्यथाऽत्यर्थमभूदथ। सोऽवोचत्तान् विभज्येमां, गृह्णीत स्नेहलालसाः ॥४२३॥ ऊचुस्ते शक्यते तात!, जातु लातुं प्रियैरपि। पीडाऽल्पाऽपि परस्यांगे, किं कस्यापि हि कोविद! ॥४२४॥सुलसस्तानुवाचैवं,यूयं जानीथ यद्यदः। सुतरां तन्न शक्येत,ग्रहीतुं कस्यचिद् व्यथा॥४२५॥ देही दोदूयमानोऽंगे, दर्भेणापि हि दारितः। तत् कथं शस्यते शस्त्रैर्भवद्भिर्भीरुको भवी॥४२६॥ एकश्चोत्पद्यते प्राणी, विपद्यतैक एव हि। एकः पुण्यात् स्वरेत्येकः,पतेत् पापात्तु दुर्गतिम्॥४२७॥ अनित्यं सर्वजीवानां,यौवनं जीवितं धनम्। ज्ञात्वाऽर्हद्धर्म्म एवेह, कार्यः शाश्वतसौख्यदः॥४२८॥ सुलसः स्वजनानेवमनुशिष्य विमृश्यकृत्। भूयो भूयोऽभयाभ्यर्णे, धर्म्मं शुश्राव शुद्धधीः ॥४२९॥ सम्यक् सम्यक्त्वपूतात्मा, दधार गृह-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

मेषिताम् । धन्यंमन्यो दृढधर्म्मा, कर्म्ममर्म्मप्रमर्द्दनः॥४३०॥ कुलायातामपि त्यक्त्वा, हिंसां रौद्ररुजामित्र । सुलसः सात्त्विकश्रेष्ठो, विपद्य त्रिदिवं ययौ ॥४३१॥–उद्याने समवासार्षीत्, पुरे राजगृहेऽन्यदा । मुनिपंचशतीयुक्तः, सुधर्म्मा गणभृद्वरः ॥४३२॥ वंदितुं तत्पदद्वंद्वं, सर्वद्धर्या श्रेणिको नृपः । शासनोत्सर्पणामिच्छन्नगच्छत् सपरिच्छदः॥४३३॥ नानायानसमारूढस्तथाऽन्योऽपि पुरीजनः । भक्तिसंभारसंजातरोमांचोच्छ्वसितांगकः ॥४३४॥ एवं प्रभावनां प्रेक्ष्य, तत्रैकः काष्ठभारिकः। गत्वा तत्र गुरुं नत्वाऽश्रौषीद् धर्म्म-मिमं यथा ॥४३५॥ जंतुघातो मृषास्तेयमब्रह्म च परिग्रहः । भो भो भव्या विमुच्यंतां, पंचैते पापहेतवः ॥४३६॥ इत्याकर्ण्य नरेंद्राद्या, पर्षन्नत्वा गृहेऽगमत् । द्रमकः स तु तत्रैव, स्वार्थार्थी तस्थिवान् स्थिरः॥४३७॥ गुरुस्तमूचे चित्तज्ञश्चिंतितं ब्रूहि सोऽब्रवीद् । जानामि यदि वः पादान्, वरिवस्यामि सर्व्वदा॥४३८॥ ततः प्रव्राज्य तं सद्यो, गुरवः कृतयोगिनः । अर्प्पयामासुराचारं, शिक्षया-मासुराशु ते ॥४३९॥ तं गीतार्थयुतं भिक्षाचर्यायामन्यदा गतम् । प्रागवस्थाविदः पौराः, प्रेक्ष्य प्रोचुरहंयवः ॥४४०॥ अहो महर्धे-स्त्यक्ताऽयं, महासत्त्वो महामुनिः । इति वक्रोक्तितः खिड्गैरुपाहस्यत सोऽन्वहम् ॥४४१॥ ततोऽसौ शैक्षकत्वात्तं, परीषहमसासहिः। सुधर्म्मस्वामिना प्रोचेऽनूचानेन वचस्विना॥४४२॥ संयमे किं समाधानमस्ति ते सुष्ठु ? सोऽभ्यधात् । अस्ति युष्मत्प्रसादात्तु, विहारो-ऽन्यत्र चेद् भवेत्॥४४३॥ विधास्यते समाधानं, वत्सेत्युक्त्वा गुरुस्ततः । अभयस्यागतस्याख्याद्विहारो नो भविष्यति ॥४४४॥ अभयः स्माह नः कस्मादकस्माद् द्रुतमीदृशः । अप्रसादोऽथ तेऽप्रोचुर्मुनेरस्य परीषहः॥४४५॥ अभयोऽप्यभ्यधादेकं, दिवसं स्थीयतां प्रभो ! । निवर्त्तेत न चेदेष, न स्थातव्यं ततः परम्॥४४६॥ एवमस्त्विति सूर्युक्तोऽभयोऽथैत्य नृपांगणे। रत्नकोटित्रयीं कृष्ट्वा, राशित्रयमकारयत् ॥४४७॥ तुष्टो राजा ददात्युच्चै रत्नकोटित्रयीं जनाः ! । गृह्णीतैनां यथेष्टं तु, पटहेनेत्यघोषयत् ॥४४८॥ ततोऽमिलद् द्रुतं लोको,

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

लोलुभः सोऽभयेन तु ।बभाषे गृह्यतामेषा, रत्नकोटित्रयी मुधा ॥४४९॥ युष्माभिः स्वगृहे गत्वाऽनया किंतु गृहीतया। यावज्जीवं विमोक्तव्यं, जलमग्निः स्त्रियस्तथा ॥४५०॥ इत्याकर्ण्य जनास्तूर्णमुत्कर्णास्तद्जिघृक्षवः। बिभ्यतो निश्चलास्तस्थुः, सिंहनादं मृगा इव ॥४५१॥ अभयोऽप्यभ्यधात् कस्माद्, विलंबस्तेऽप्यदोऽवदन्। लोकोत्तरमिदं लोकः, किं कश्चित्कर्तुमीश्वरः ?॥४५२॥ सोऽत्रदन् मुनिना तेन, त्रीण्यप्येतानि तत्यजे। तत् कुतो हसतैवं तमतिदुष्करकारकम् ॥४५३॥ न जानीमो वयं स्वामिंस्तत्स्वर्षेः सत्त्वमीदृशम्। तमृषिं मर्षयिष्यामस्तदिदानीं महामते !॥४५४॥ अभयेन समं गत्वा, श्रीमंतस्ते प्रणम्य तम्। महर्षिं क्षमयामासुः,स्वापराधं मुहुर्मुहुः ॥४५५॥–सभासीनोऽन्यदा राजा,जगादास्मिन् पुरे जनाः !। सांप्रतं सर्वपण्येभ्यः, समर्घं किमु लभ्यते ? ॥४५६॥ ततः समस्तसामंतमंत्रिमुख्या बभाषिरे। समर्घं जांगलं देवेत्यभयोऽस्थाच्च मौनभृत् ॥४५७॥ दक्षः क्षितिपतिः प्रोचेऽभय! त्वं किं न भाषसे ?। सम्यग्विचिंत्य वक्ष्येऽहमित्युवाचाभयः सुधीः॥४५८॥ अंतरंतःपुरस्याथ, द्वितीयेऽह्न्यभयो नृपम्। प्रच्छन्नं स्थापयामास, प्रख्याप्यापाटवं तनोः ॥४५९॥ चिकित्सा क्रियतेऽत्यर्थं, शकाश्येति ततोऽभयः। शिक्षयित्वा नरं प्रैषीद्, वेश्मन्येकस्य मंत्रिणः॥४६०॥ तेनापि कृतसन्मानः, स राजपुरुषोऽवदत्। वरमंत्रिन्! सुवैद्योक्तभैषज्यार्थमिहागमम्॥४६१॥ मंत्र्यप्यूचे समादेशो, दीयतामथ सोऽवदत्। स्वकालेयकमांसस्य, यवमात्रं समर्प्पय ॥४६२॥ इत्याकर्ण्य वचो भीष्मं, स मंत्री मृत्युभीलुकः। कृतांजलिपुटः प्रोचे, रक्ष मां राजवल्लभ!॥४६३॥ गृहाण भूयसीः स्वर्णकोटीर्जीवितदायक!। किं चान्येऽपि च तिष्ठंति,सामंतसचिवादयः ॥४६४॥ सोऽपि तस्योपरोधेन, वचो मेनेऽग्रहीच्च ताः। एवमन्यान्यसामंतमंत्रिभ्यः स्वर्णमाददे ॥४६५॥ मेलयित्वा बहु स्वर्णमार्प्पयत् सोऽभयाय तत्। पुंजीचकार तत् सर्वं, सोऽपि राजगृहांगणे ॥४६६॥ द्वितीयदिवसेऽकस्मात्,किल कल्योऽभवन्नृपः। निष-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

साद यथास्थाने, मंगल्यानि च जज्ञिरे ॥४६७॥ स्वर्णराशिमथोत्तुंगं, मेरोः शृंगमिवामलम् । वीक्ष्य क्षोणीपतिः प्रोचेऽभयं किमिद-
मीक्ष्यते ?॥४६८॥ विस्फुरत्कांतदंतांशुश्रेणिः श्रेणिकसूर्जगौ । ननु कैलाशशैलोऽयं, मांगल्यार्थमिहागमत् ॥४६९॥ राजा जगाद
किं कोऽपि, त्वयाऽलुब्धत पत्तने ?। अभयः स्माह सर्वत्र, देव ! सम्यग् निरूप्यताम् ॥४७०॥ नृपोऽप्युवाच पर्याप्तं, वक्रोक्त्या सुनृतं
वद । सोऽप्याख्यात्पिशितं स्वामिन् !, समर्घमिति मन्यताम्॥४७१॥ किं किमेतत् नृपेणोक्ते, सोऽपि सर्वं निवेद्य तत् । ऊचे यतस्त-
तस्तेन, नोच्यते तात ! धीमता॥४७२॥ सामंतादींस्ततः प्रोचेऽभयो भूताभयप्रदः। आकर्णयत तत्रार्थे,सकर्ण्याः ! खलु निर्णयम्
॥४७३॥ प्राणैः समं यथा भेदं, जानतोऽप्यात्मनः किल । स्वप्राणा दुस्त्यजास्तद्वदन्यस्य सुतरां पुनः॥४७४॥ तद् भो अतिमहार्घं
हि, स्वमांसं त्रिजगत्यपि । तेऽप्यूचुः सत्यमेवैतद्वचस्ते धीनिधेऽभय !॥४७५॥ एवं प्रभावयन्नर्हच्छासनं चंडशासनः । श्रेणिकोऽभय-
संयुक्तश्चिरं साम्राज्यमन्वशात् ॥४७६॥–अभयं श्रेणिकोऽन्येद्युः, प्रोचे राज्यं त्वमाश्रय । श्रीवीरचरणांभोजं, श्रयिष्येऽहं द्विरेफ-
वत् ॥४७७॥ पितृभक्तो भवाद् भीरुर्भाविभद्रोऽभयोऽभ्यधात् । यदादिशथ तत् साधु, प्रतीक्षस्व क्षणं पुनः ॥४७८॥ प्रव्रजिष्यंति
राजानस्त्यक्त्वा राज्यं कियच्चिरम् । अभयः संदिदेहैवं, शुद्धात्मबुद्धिसेवधिः ॥४७९॥ इतश्च श्रीमहावीरः, प्रव्राज्योदायनं नृपः ।
मरुमंडलतस्तत्राभ्यागत्य समवासरत् ॥४८०॥ दिष्ट्याऽद्य भगवानागात्, संशयोच्छेदहेतवे । ममैव केवलस्यायमिति हृष्टोऽभय-
स्ततः ॥४८१॥ तत्र गत्वाऽऽशु वंदित्वा, पप्रच्छ परमेश्वरम् । राजर्षिः कोऽंतिमोऽथाख्यत् ,स्वामी नृपमुदायनम् ॥४८२॥ भगवंतं
ततो नत्वाऽभ्येत्य श्रेणिकसन्निधौ । प्रोचे प्रणम्य पर्याप्तं,मम राज्येन सर्वथा॥४८३॥ तात ! नाम्नाऽभयोऽहं तु,सभयः स्वामिवाक्यतः। ॥२६॥
यदि राजा ततो नर्षिरित्याचख्यौ जगद्गुरुः ॥४८४॥ तात ! त्वदंगजस्यापि, शिरःस्थे त्रिजगत्पतौ । प्रव्रज्या यदि मे न स्यात्,

For Private and Personal Use Only

मत्तः कोऽन्योऽधमस्ततः ?॥४८५॥ तदलं मम राज्येन, व्रतविघ्नकृता ततः। राजोचे मामनापृच्छय, प्रव्राजीर्मा कदापि हि॥४८६॥ मेने तदा पितुर्वाक्यं, प्रविव्रजिषुरप्यसौ। उत्सुका अपि धीमंतो, गुर्वाज्ञां खंडयंति न ॥४८७॥ शीतर्त्तावन्यदा राजाऽपराह्णे चेल्लणायुतः। कर्म्मारिवीरं श्रीवीरं, वंदितुं विधिवद्ययौ ॥४८८॥ वंदित्वा श्रीमदर्हंतं, वलितौ तौ तु दंपती। जलोपांते ददृशतुः, श्रमणं प्रतिमास्थितम् ॥४८९॥ अप्रावृतं च तं शीतपरीषहसहं मुनिम्। तौ दंपती ववंदाते, सपद्युत्तीर्य वाहनात् ॥४९०॥ तं क्षमा-श्रमणं भक्त्या, सह पत्न्या महीपतिः। वंदित्वा स्वं ययौ गेहं, पुण्यवार्तां प्रपञ्चयन्॥४९१॥ निर्दग्धागुरुकर्पूरधूपे भूमिपतिर्निशि। आगारेऽवसदानंदप्रदे चेल्लणया सह ॥४९२॥ निद्रायां चेल्लणादेव्याः, प्रच्छदात् पाणिपल्लवः। बहिर्बभूव शीतर्त्त्वा, जजागाराशु चेल्लणा ॥४९३॥ तदा चाप्रावृतांगं तं, महर्षिं प्रतिमास्थितम्। स्मृत्वोवाचेदृशे शीते, स कथं हा भविष्यति ? ॥४९४॥ साऽऽस-साद पुनर्निद्रां, तथैव सरलाशया। प्रबुद्धस्तद् वचः श्रुत्वा, चिंतयामास भूपतिः ॥४९५॥ नूनमस्य मनस्यन्यो, यदेवमनुशोचति। एवमीर्ष्याकुलस्यास्य, सा रात्रिर्जाग्रतो ययौ ॥४९६॥ अंतरंतःपुरं गंतुं, प्रातरादिश्य चेल्लणाम्। आहूयाभयमित्यूचे, श्रेणिकस्तीव्र-शासनः ॥४९७॥ ज्ञातमंतःपुरं रेऽद्य, दुराचारेण दूषितम्। तत् सर्वं ज्वाल्यतां मा भूर्मातृमोहादनीदृशः ॥४९८॥ इत्यादिश्याभयं राजा, स्वामिनं वंदितुं ययौ। अभयो मंत्रयांचक्रे, मनीषी मनसा सह ॥४९९॥ सतीमतल्लिकाः सर्वा, मातरो मे स्वभावतः। ता-स्वहं सर्वदा भक्तस्ताताज्ञा पुनरीदृशी ॥५००॥ तदापि चित्रमुत्पाद्य, कालक्षेपः करिष्यते। मन्ये मत्कार्यसिद्धिश्च, प्रस्तावेऽत्र भवेद्यदि ॥५०१॥ जीर्णां करिकुटीमंतःपुरपार्श्वेऽभयस्ततः। ज्वालयामास निर्दग्धः, शुद्धांत इति घोषयन् ॥५०२॥ इतश्च श्रेणिकोऽपृच्छत्, समये परमेश्वरम्। एकपत्नी किमनेकपत्नी वा चेल्लणा प्रभो ! ॥५०३॥ स्वाम्याख्यद् धर्म्मपत्नीयमेकपत्नी महासती। मा शंकिष्ठा-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

स्त्वमस्यास्तद् ,वचस्तत्साधुगोचरम् ॥५०४॥ इदं च श्रेणिकः श्रुत्वा, पश्चात्तापमुपागतः। सपदि स्वामिनं नत्वा, प्रतस्थे स पुरं प्रति ॥५०५॥ तथा प्रदीपनं कृत्वाऽभ्यायांतं चाभयं नृपः। अपृच्छद्सदादेशो, भवता किमनुष्ठितः?॥५०६॥ अभयोऽप्यभ्यधाद् भीत, इव नत्वा कृतांजलिः। स्वाम्यादेशोऽपरस्यापि, प्रमाणं किं पुनर्मम॥५०७॥ राजा प्रोवाच रे पाप!, दग्ध्वा मातृजनं निजम्। जीवसि त्वं किमद्यापि?, किं नापप्तः प्रदीपने?॥५०८॥ स स्माह समयं ज्ञात्वा,यद्येवं देव! देहि मे। आदेशं यद्विशाम्यद्य,भावाग्नौ दुःख-दाहके ॥५०९॥ एवमस्त्विति राज्ञोक्ते, स वृत्तांतमचीकथत्। हृष्टो राजाऽस्य सत्याग्रश्चक्रे निष्क्रमणोत्सवम् ॥५१०॥ ततः श्रीवीर-पादांते, नांदेयो नंदया सह। प्रव्रज्यां परिजग्राह, सुधीः स्वार्थाय सत्वरः ॥५११॥ अधीत्यैकादशांगानि, पालयित्वा चिरं व्रतम्। विपद्य विजये जज्ञे, देवोऽनुत्तरनामके॥५१२॥ ततश्च्युत्वा विदेहेषूत्पद्य दीक्षां ग्रहीष्यति। केवलज्ञानमासाद्य, स सिद्धिपद-मेष्यति ॥५१३॥ श्रेणिकस्तु निजं राज्यं, शून्यं मेने विनाऽभयात्। देवराजो दिवो राज्यमिव वाचस्पतिं विना॥५१४॥ सुमंगल-भवे श्येनमुनिपारणभंजकं। द्वेषीव च्छिद्रमासाद्य, डुढौके कर्म्म तस्य तत् ॥५१५॥ कालाद्यैर्दशभिः सार्धं, मंत्रयित्वा विमातृजैः। कूणिकः श्रेणिकं गुप्तौ, चिक्षेप प्राग्निदानतः ॥५१६॥ ततो राज्यमधिष्ठाय, चर्म्मयष्ट्या स निष्ठुरान्। प्रहारानन्वहं दुष्टः, पितुः पंच शतान्यदात् ॥५१७॥ अन्नपाननिरोधं च, कारयामास यामिकैः। तस्यांतरायिकं कर्म्म,स्मारयन्निव विस्मृतम् ॥५१८॥ श्रेणिको यामिकानूचे,क्रूरात्मा कूणिकोऽधिकम्। रौद्रमूर्त्तिर्यदाऽभ्येति,तदा शंसेत मे द्रुतम्॥५१९॥ शतायुसुरया केशानार्द्रयित्वाऽथ चेल्लणा। मापपिंडीं तदंतस्थां, कृत्वा गत्वा नृपांतिके ॥५२०॥ अभोजयन्नृपं माषान्, धावित्वा कबरीपयः। अपाययच्च येन स्यात्, घातान् सोढुं क्षमस्तकान् ॥५२१॥ कूणिकस्य नरेन्द्रस्य, भुंजानस्यान्यदा मुदा। देवीपद्मावतीजात, उदायीनामनंदनः ॥५२२॥ अंकस्थोऽ-

For Private and Personal Use Only

मूत्रयत् स्थाले, त्यक्त्वाऽन्नं मूत्रमिश्रितम्। तथैव बुभुजे राजाऽपश्यन् मातृमुखं मुहुः॥५२३॥ बभाषेऽम्बां च विश्वेऽस्मिन्नान्यस्यापि हि कस्यचित्। प्रियः पुत्रो ममेवास्ति, ततस्तं चेल्लणाऽब्रवीत् ॥५२४॥ रे रे मर्त्यन्नुवोऽसि त्वं, किमेवं स्वं प्रशंससि?। पितुः प्रियो यथाऽभूस्त्वं, तादृगन्यो न कस्यचित् ॥५२५॥ यः स्वास्ये शैशवेऽक्षैप्सीत्, पूयक्लिन्नां तवांगुलिम्। पितुस्तस्य कृतघ्नेन,सुप्रत्युपकृतं त्वया ॥५२६॥ श्रुत्वा मातृमुखादात्मोत्पत्तिं मावमुखोऽथ सः। स्वं निंदन्नभ्युदस्थाद् द्राक्, मुमुक्षुः पितरं निजम्॥५२७॥ दधावे रंहसोद्यम्य, लोहदंडं कृतांतवत्। आक्रष्टुं श्रेणिकं गुप्तेर्भंक्त्वा तत्काष्ठपंजरम् ॥५२८॥ प्रेक्ष्य प्राहरिकैर्मंक्षु, शशंसे श्रेणिकाय सः। विद्युद्दंड इवासह्यः, स्वामिन्नायाति ते सुतः ॥५२९॥ मारयिष्यति मामेव, दुरात्मा कृतघ्ना(हा)ग्रणीः। विडंब्येति नृपो ध्यात्वा, प्राशीत्तालपुटं विषम् ॥५३०॥ प्राग्बद्धायुष्कतायोगाद्विपद्य श्रेणिकस्ततः। प्रथमप्रस्तटे रत्नप्रभायां नारकोऽभवत् ॥५३१॥ पराशुं श्रेणिकं प्रेक्ष्य, तत्रायातोऽथ कूणिकः। आक्रंदन् कारयामास,श्रेणिकस्यौर्ध्वदेहिकम् ॥५३२॥ मंत्रिभिर्विप्रलब्धोऽथ,सशोकः कूणिको नृपः। पिंडपातादिकार्येषु, पितृतृप्त्यै प्रवर्तितः॥५३३॥ निवेश्य सोऽन्यदा चंपां,त्रिखंडेशोऽन्यदा विभुम्। पप्रच्छाविरतश्चक्री, मृत्वा-क्वेति? प्रभुर्जगौ ॥५३४॥ सप्तमे नरके सोऽथ, प्रोचे क्वाहं गमी विभुः?। षष्ठे इत्यवदद्यच्त्वं, न चतुर्दशरत्नभृत् ॥५३५॥ सोऽथ कूटानि रत्नानि, कृत्वा वैताढ्यमासदत्। तमिस्रे स हतः षष्ठं, नरकं कूणिकोऽगमत् ॥५३६॥ उदायीनृपतिर्जज्ञे, ततः, कूणिकराट्-सुतः। चंपापुर्यां प्रचंडाज्ञस्त्रिखंडभरताधिपः ॥५३७॥ सोऽन्यदा पाटलीपुत्रं, कृत्वा तत्र कृतस्थितिः। जिनधर्म्मोद्यतः प्राज्यं, साम्राज्यं सुचिरं व्यधात् ॥५३८॥ श्रीवीरं पुर्यपापायां, निर्वाणसमयेऽन्यदा। मंडलेशः पुण्यपालो,नत्वाऽप्राक्षीदिदं यथा ॥५३९॥ प्रश्नश्चायं यथाऽभाणि, प्रभुश्रीहेमसूरिभिः। तथैव लिख्यतेऽस्माभिस्तद्वचः कस्य ने मतम्? ॥५४०॥ स्वामिन्! स्वप्ना मयाऽ-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

द्याष्टौ, दृष्टास्तत्र गजः१ कपिः२ । क्षीरद्रुः३ काक४ सिंहा५ ब्ज६ बीज७ कुंभा इमे क्रमात् ॥५४१॥ तथाऽऽख्याहि फलं तेषां, भीतोऽस्मि भगवन्नहम् । इति पृष्टो जगन्नाथो,व्याचकारेति तत्फलम् ॥५४२॥ विवेकवंतो भूत्वाऽपि,हस्तितुल्या अतः परम् । वत्स्यंति श्रावका लुब्धाः, क्षणकार्धिसुखे गृहे ॥५४३॥ न दौस्थ्येऽन्यस्वचक्रे वा, प्रव्रजिष्यंत्युपस्थिते । आत्तामपि परिव्रज्यां, त्यक्ष्यंति च कुसंगतः ॥५४४॥ विरलाः पालयिष्यंति, कुसंगेऽपि व्रतं खलु । इदं गजस्वप्नफलं, कपिस्वप्नफलं त्वदः ॥५४५॥ प्रायः कपिसमा लोलपरिणामाल्पसत्त्वकाः । आचार्यमुख्या गच्छस्थाः, प्रमादं गामिनो व्रते ॥५४६॥ ते विपर्यासयिष्यंति, धर्म्मस्थानितरानपि । भाविनो विरला एव, धर्म्मोद्योगपराः पुनः ॥५४७॥ धर्म्मश्लथेषु ये शिक्षां, प्रदास्यन्त्यप्रमादिनः। ते तैरुपहसिष्यन्ते, ग्राम्यैर्ग्रामस्थपौरवत् ॥५४८॥ इत्थं प्रवचनावज्ञाऽतः परं हि भविष्यति । प्लवंगमस्वप्नफलमिदं जानीहि पार्थिव !॥५४९॥ क्षीरद्रुतुल्याः सुक्षेत्रे, दातारः शासनार्चकाः। श्रावकास्ते तु रोत्स्यन्ते, लिङ्गिभिर्वञ्चनापरैः॥५५०॥ तेषां च प्रतिभास्यंति, सिंहसत्त्वभृतोऽपि हि। महर्षयः सारमेया, इवासारमतिस्पृशाम्॥५५१॥ आदास्यंते सुविहितविहारक्षेत्रपद्धतिम् । लिङ्गिनो बब्बूलसमाः,क्षीरद्रुफलमीदृशम् ॥५५२॥ धृष्टस्वभावा मुनयः, प्रायो धर्मार्थिनोऽपि हि । रंस्यन्ते नहि गच्छेषु, दीर्घिकांभःस्विव ध्विकाः ॥५५३॥ ततोऽन्यगच्छिकैः सूरिप्रमुखैर्वंचनापरैः । मृगतृष्णानिभैः सार्धं, चलिष्यन्ति जडाशयाः॥५५४॥ न युक्तमेभिर्गमनमिति तत्रोपदेशकान् । बाधयिष्यन्ते नितांतं, काकस्वप्नफलं त्वदः॥५५५॥ सिंहतुल्यं जिनमतं, जातिस्मृत्यादिसुस्थितम् । विपत्स्यतेऽस्मिन् भरतावनौ धर्मज्ञवर्जिते ॥५५६॥ न कुतीर्थिकतिर्यंचोऽभिभविष्यंति जातुचित् । स्वोत्पन्नकृमिवत् किंतु, लिंगिनोऽशुद्धबुद्धयः ॥५५७॥ लिंगिनोऽपि प्राक् प्रभावाच्,छ्वापदाभैः कुतीर्थिकैः । न जात्वभिभविष्यंति,सिंहस्वप्नफलं त्वदः॥५५८॥ अब्जाकरेष्वंबुजानि,सुगंधानीव देहिनः। धर्म्मिका

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

न भविष्यंति,संजाताः सुकुलेष्वपि॥५५९॥ अपि धर्म्मपरा भूत्वा,भविष्यंति कुसंगतः। ग्रामावकरकोत्पन्नगर्दभाब्जवदन्यथा॥५६०॥ कुदेशे कुकुले जाता, धर्म्मस्था अपि भाविनः। हीना इत्यनुपादेयाः, पद्मस्वप्नफलं ह्यदः॥५६१॥ यथा फलायाबीजानि, कर्षुर्बुद्ध्वो षरे वपेत्। तथा वप्स्यंत्यकल्प्यानि, कुपात्रे कल्प्यबुद्धितः॥५६२॥ यद्वा घुणाक्षरन्यायाद्यथा कोऽपि कृषीवलः। अबीजांतर्गतं बीजं, वपेत् क्षेत्रे निराशयः ॥५६३॥ अकल्प्यांतर्गतं कल्प्यमज्ञाताः श्रावकास्तथा। पात्रे दानं करिष्यंति, बीजस्वप्नफलं ह्यदः ॥५६४॥ क्षमादिगुणपद्मांकाः, सुचरित्रांबुपूरिताः । रहःस्था भाविनः कुंभा, इव स्तोका महर्षयः॥५६५॥ श्लथाचारचरित्राश्च,कलशा मलिना इव । यत्र तत्र भविष्यंति, बहवो लिंगिनः पुनः ॥५६६॥ समत्सराः करिष्यंति, कलहं ते महर्षिभिः। उभयेषामपि तेषां, साम्यं लोके भविष्यति ॥५६७॥ गीतार्था लिंगिनश्च स्युः, साम्येन व्यवहारिणः। जनेन ग्रथिलेनेवाग्रथिलोऽभूद्यथा नृपः॥५६८॥ तथा हि पृथिवीपुर्यां, पूर्णो नाम महीपतिः। सुबुद्धिस्तस्य चामात्यो, निधानं बुद्धिसंपदः ॥५६९॥ कालं तेनागमिष्यंतं, पृष्टोऽन्येद्युः सुबुद्धिना। लोकदेवाभिधोऽनेन, नैमित्तिकवरोऽब्रवदत् ॥५७०॥ मासादनंतरं मेघो, वर्षिता तद्जलं पुनः। यः पास्यति स सर्वोऽपि, ग्रहग्रस्तो भविष्यति ॥५७१॥ कियत्यपि गते काले, सुवृष्टिश्च भविष्यति। पुनः सज्ञा भविष्यंति, तत्पयःपानतो जनाः ॥५७२॥ राज्ञो मंत्री तदाचख्यौ, राजाऽप्यानकताडनात्। आख्यापयद् जने वारिसंग्रहार्थमथादिशत् ॥५७३॥ लोकोऽपि हि तथा चक्रे, ववर्षोक्तेऽह्नि चांबुदः। कियत्यपि गते काले, संग्रहीतांबु निष्ठितम् ॥५७४॥ अक्षीणसंग्रहांभस्कौ, राजामात्यौ तु तौ विना। नवांबु लोकाः सामंतप्रमुखाश्च पपुस्ततः ॥५७५॥ तत्पानाद् ग्रथिलाः सर्वे, ननृतुर्जहसुर्जगुः। स्वैरं चिचेष्टिरेऽन्यच्च, विना तौ राजमंत्रिणौ ॥५७६॥ जनाः सर्वे सामंताद्या, ननृतुर्जहसुर्जगुः। स्वैरं चिचेष्टिरेऽन्यच्च, विना तौ राजमंत्रिणौ ॥५७७॥ राज्ञामात्यैर्विसदृशौ,

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

सामंताद्या निरीक्ष्य तौ। मंत्रयांचक्रिरे नूनं, ग्रथिलौ राजमंत्रिणौ ॥५७८॥ असद्विलक्षणाचाराविमकावपसार्य तत्। अपरौ स्थापयिष्यामः, स्वोचितौ राजमंत्रिणौ ॥५७९॥ मंत्री ज्ञात्वेति तन्मंत्रं, नृपायाख्यान्नृपोऽवदत्। आत्मरक्षा कथं कार्या, तेभ्यो वृंदं हि राजवत् ॥५८०॥ मंत्र्यूचे ग्रथिलीभूय, स्थातव्यं ग्रथिलैः सह। त्राणोपायो न कोऽप्यन्य, इदं हि समयोचितम् ॥५८१॥ कृत्रिमग्रथिलीभूय, ततस्तौ राजमंत्रिणौ। तेषां मध्ये ववृताते, रक्षंतौ निजसंपदम् ॥५८२॥ ततः सुसमये जाते, शुभवृष्टौ नवोदके। पीते सर्वेऽभवन् स्वस्था, मूलप्रकृतिधारिणः ॥५८३॥ एवं च दुष्षमाकाले, गीतार्था लिंगिभिः सह। सदृशीभूय वर्त्स्यंति, भाविस्वसमयेच्छवः ॥५८४॥ इति श्रुत्वा स्वप्नफलं, पुण्यपालो महामनाः। प्रबुद्धः प्राव्रजत्तत्र, क्रमान् मोक्षमियाय च॥५८५॥ अथेन्द्रभूतिः श्रीवीरं, नत्वाऽप्राक्षीत् कृतांजलिः। एष्यत्कालस्वरूपं तु, शलाकापुरुषान्वितम् ॥५८६॥ स्वाम्युवाच गतैः पक्षैर्नवत्या मम निर्वृतेः। प्रवर्त्स्यति तथैकोनैः, पंचमो दुष्षमारकः ॥५८७॥ तथांते केवलं भावि, मन्निर्वाणाच्च गौतमे। द्वादशाब्दास्ततोऽप्यष्टौ, वत्सराणि सुधर्म्मणः ॥५८८॥ भावी तस्य विनेयस्तु, जंबुश्चरमकेवली। वत्सराणि चतुश्चत्वारिंशतं सर्वविच्चभृत्॥५८९॥ व्युच्छेत्स्यंत्यत्र चैतानि, दश स्थानानि तद्यथा। आहारकपुलाकाख्ये,द्वे लब्धी परमावधिः॥५९०॥ क्षपकोपशमश्रेण्यौ, मनःपर्यवकेवलौ। संयमत्रिकमंत्यं च, जिनकल्पमहोदयौ ॥५९१॥ भाविनः षट् प्रभवाद्याः, श्रुतकेवलिनः क्रमात्। अत्र चांत्या चतुष्पुर्व्वी, स्थूलभद्रेऽतमेष्यति॥५९२॥ महाप्राणं च संस्थानमाद्यसंहननं तथा। मम मोक्षाद् गते वर्षशते सप्ततिसंयुते ॥५९३॥ महागिरिसुहस्त्याद्या, भूरयः सूरयस्ततः। गणभृद्वज्रपर्यंता, भाविनो दशपूर्विणः॥५९४॥ दशपूर्व्या व्यवच्छेदस्तुर्यसंहननस्य च। षोडशाब्दोनषड्वर्षशत्या तत्र भविष्यति॥५९५॥ दशवर्षशतांतेऽतो, भावी पूर्वगतस्य तु। क्रमादेकादशांग्याश्च,समं छेदश्रुतेन तु॥५९६॥ पंचमासोत्तरे-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

ऽप्यष्टाविंशत्यब्दयुतेषु च । मम मोक्षाद् गतेष्वब्दशतेष्वेकोनविंशतौ॥५९७॥ भावी म्लेच्छकुले राजा, विष्टौ चैत्राष्टमीदिने । त्रिनामा पाटलीपुत्रे, कल्की रुद्रश्चतुर्मुखः ॥५९८॥ मथुरापुरि कृष्णस्य, तदा देवकुलं महत् । अकस्मात् पवनोद्धूतं, जीर्णद्रुवत् पतिष्यति ॥५९९॥ दुर्भिक्षडमरावृष्टिचौरेतिभयविह्वलाः । भविष्यंति जनास्तस्मिन्, नृपे क्रूरतराशये ॥६००॥ कौमारेऽष्टादशाब्दानि, तावंत्येव च दिग्जये । ततो निष्कंटकं राज्यं, कल्किनो हि भविष्यति ॥६०१॥ नंदस्य सोऽन्यदा स्तूपान्, पंच प्रेक्ष्यातिलोलुपः। खानयित्वा च तान् सर्वान्, भूरि स्वर्णं ग्रहीष्यति ॥६०२॥ धनाय यावत् सर्वस्मिन्, खन्यमानेऽथ तत्पुरे । गौः पाषाणमयी दैवादुत्थास्यति चतुष्पथे ॥६०३॥ घट्टयिष्यति सा साधून्, व्रजतस्तेन वर्त्मना । जलोपसर्गमासन्नं, ज्ञास्यंति स्थविरास्ततः ॥६०४॥ ज्ञात्वेति केचिदन्यत्र, विहरिष्यंति साधवः। स्थास्यंत्यन्ये तु तत्रैव, पानान्नादिषु गृध्नवः ॥६०५॥ सर्वे पाखंडिनोऽन्येद्युः, कल्किना याचिताः करम् । ददुर्यथार्थितं तस्मै, ते यस्मात् सपरिग्रहाः ॥६०६॥ साधवोऽप्यर्थितास्तेनाभ्यधुर्धर्म्मधना वयम् । धर्म्मलाभं विना राजन्!, दद्मः किं तेऽन्यदुत्तमम् ? ॥६०७॥ पुराणेषूदितं किंच, पालयन् व्रतपालकान् । साधूंस्तत्पुण्यषष्ठांशभाजनं भूपतिर्भवेत् ॥६०८॥ दुष्कर्म्मणस्तदस्मात् त्वं, विरम क्षेममर्दनात् । एवमुक्तेऽपि तैरेष, भावी भृकुटिभीषणः ॥६०९॥ पूर्देवता ततोऽवक्ष्यत्, रे रे किं त्वं मुमूर्षसि ? । कल्किन्नकिंचनान् पूज्यान्, यदेवं याचसे यतीन् ॥६१०॥ भीतस्ततो मुनीनेष, क्षमयित्वा विमोक्ष्यति । अथोत्पाता भविष्यंति, नगरक्षयसूचकाः ॥६११॥ तत्र सप्तदशाहानि, वर्षिष्यति घनस्ततः । उद्धृत्य तत्पुरं गंगाप्रवाहः प्लावयिष्यति ॥६१२॥ तत्र प्रातिपदः सूरिः, संघलोकोऽपि कोऽपि च । स्थाने स्थास्यति कल्की च, पुरलोकोऽपि कश्चन ॥६१३॥ निवृत्ते च पयःपूरे, करिष्यति नवं पुरम् । नंदद्रव्येण तेनोच्चैः, कल्की केतुरिवोत्कटः ॥६१४॥ भविष्यंति जिनौकांसि, चरिष्यंति

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

महर्षयः। सुभिक्षं भावि पंचाशद्वत्सराणि निरंतरं ॥६१५॥ अथासन्नमृतिः कल्की, लिंगानि त्याजयिष्यति। सपत्राकृतिपात्रं च, करिष्यति कुलिंगिनः ॥६१६॥ क्षिप्त्वा प्रातिपदाचार्यं, ससंघं वृषवाटके। मार्गयिष्यति भिक्षायाः, षष्ठभागं स दुष्टधीः ॥६१७॥ संघः शक्रं समाराद्धुं, कायोत्सर्गं विधास्यति। कृतविप्राकृतिः क्षिप्रं, ततः सोऽत्रैत्य वक्ष्यति॥६१८॥ कल्किन्नरौत्सीः किं साधून्, कल्कपंकाकलंकितान्? । स वक्ष्यति न मे रांति, भिक्षाषष्ठांशमप्यमी॥६१९॥ शक्रो भाषिष्यते नैते, किंचिद्दास्यंति निर्ममाः। तन् मुंचामून् द्रुतं नत्वा, भाव्यनर्थस्तु तेऽन्यथा ॥६२०॥ जल्पिष्यत्यथ जल्पाकः, कल्की कुप्यन्नरे भटाः!। अपसारयत क्षिप्रं, विप्रं धृत्वा गले दृढम्॥६२१॥ ततः शक्रोऽपि सक्रोधः, कल्किनं कल्कमंदिरम्। चपेटामुत्कटां दत्त्वा,द्राग् भस्मसात् करिष्यति॥६२२॥ आयुः संपूर्य राजाऽसौ, षडशीतिसमास्ततः। भविष्यति दुरंतायां, नारको नरकावनौ ॥६२३॥ दत्ताख्यं कल्किनः पुत्रं, विधाय परमार्हतम्। स्थापयित्वा च तद्राज्ये,संघं नत्वा गमी हरिः ॥६२४॥ दत्तो धर्म्मैकचित्तोऽथ,पितुः पापफलं स्मरन्। करिष्यति महीं मेनां, जिनायतनमंडिताम् ॥६२५॥ जितशत्रुयथाख्यातस्तत्पुत्रो भविता नृपः। तस्यापि चौघघोषाख्यो, जिनसाधुकृतार्चनः ॥६२६॥ भविताऽन्यान्यभूपानां, यावद् विमलवाहनः। भविता दुष्षमारांते, तावद् धर्म्मश्च संततम् ॥६२७॥ इदं च भरतक्षेत्र-मर्हत्काले पुराऽभवत्। ग्रामारामपुराकीर्णं,श्रिया स्वर्लोकसन्निभम् ॥६२८॥ ग्रामा नगरवद्रम्याः,स्वःपुराणीव तानि तु। कुटुंबिनो नृपौपम्या, नृपास्तु धनदोपमाः॥६२९॥ आचार्याश्चंद्रमस्तुल्याः, पितरो देवतानिभाः। जननीजनकश्वश्रूश्वशुरा जनका इव॥६३०॥ सत्यशौचार्जवक्षांतिविनयादिगुणान्वितः। सुशीलः सुकुलीनश्च, राजन्वांश्च जनस्तदा ॥६३१॥ कालो यथा यथा गामी, दुष्षमा-यामतः परम्। निर्धर्म्मस्त्यक्तमर्यादो, भावी लोकस्तदा तदा ॥ ६३२ ॥ मिथ्यात्वमोहितमतिर्दयादाक्षिण्यवर्जितः। अविनीतो

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

जनः क्रूरः, कृतघ्नश्च भविष्यति ॥६३३॥ ग्रामाः पितृवनप्रायाः, पुराणि प्रेतलोकवत् । कुटुंबिनोऽतिभृत्याश्च, कृतांतप्रतिमा नृपाः ॥६३४॥ लुब्धा लास्यंति निष्पीड्य, द्रव्यमेते नियोगिनः । तेऽपि लोकांस्ततो भावी, तिमिंतिमिंगिलक्रमः ॥६३५॥ चौराश्चौर्येण लुंट्यंति, भूम्या भूमिभुजः करैः । देशांश्चांदोलयिष्यंति, वातोद्धूतबहित्रवत्॥६३६॥ पितॄन् देवान् गुरूंश्चापि,मानयिष्यंति मानवाः। न प्रत्यक्षीभविष्यंति, देवा देव्यो यथा तथा ॥६३७॥ मनोवाक्कायकौटिल्यात्, स्नुषाः स्युः सर्प्पिणीसमाः। कालरात्रिसमाः श्वश्रूस्ताः प्रति क्रूरकर्म्मभिः ॥६३८॥ विलासैर्हसनैर्वेषैः, कटाक्षैर्वक्रभाषणैः । गणिका इव निर्लज्जा, भविष्यंति कुलस्त्रियः ॥६३९॥ विरोधो भविता भूयान्, जने स्वार्थैकतत्परे । धर्म्मकर्म्मप्रमादश्च, बहुजीवाकुला च भूः ॥६४०॥ कूटक्रयतुलामानैर्जनो विश्वस्तघातकः । धर्म्मोऽपि भविता शौचमविश्वासः सुहृत्स्वपि ॥६४१॥ अकाले वर्षिता काले, न वर्षिष्यति वारिदः ।सज्जना भाविनो दुःस्था, दुर्जनाः सुस्थिताः पुनः॥६४२॥ ज्ञानश्रद्धानविज्ञानध्यानधर्म्मधनायुषाम् । मणिमंत्रौषधादीनां, फलपुष्परसौजसाम्॥६४३॥ गात्रोच्चत्वस्य रूपस्य, क्रमाद्धानिर्भविष्यति । अन्येषामपि भावानां, शुभानां पंचमे ह्यरे ॥६४४॥ षष्ठेऽधिकतरा त्वेवं, ज्ञात्वा यो धर्म्मकर्म्मणि । समुद्यंस्यति तस्यैव, सफलं जन्म जीवितम् ॥६४५॥ सुधर्म्माद्या भविष्यंत्याचार्या दुष्प्रसहांतिमाः । युगप्रधानताभाजो, द्वौ सहस्रौ चतुर्युतौ ॥६४६॥ सूरिर्दुष्प्रसहो नाम, फल्गुश्रीश्च प्रवर्त्तिनी । श्रावको नायलाभिख्यः, सत्यश्रीश्राविका तथा ॥६४७॥ संघोऽयं भरते भावी,राजा विमलवाहनः। धीसखः सुमुखश्चांत्योऽवसर्प्पिण्यां हि गौतमः ॥६४८॥ तदारतस्तु यः कश्चिद्, धर्म्मो नास्तीति वक्ष्यति। संघेन गुणसंघेन, स कार्यः संघतो बहिः ॥६४९॥ सोऽथ दुष्प्रसहः स्वर्गात्,च्युतो द्वादशवार्षिकः ।प्रव्रजिष्यति तस्याष्टौ, समास्तु भविता व्रतम् ॥६५०॥ नंदीमावश्यकं चानुयोगद्वाराण्यसौ तथा । दशवैकालिकं जीतकल्पं चाध्येष्यते

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

सुधीः ॥६५१॥ स चतुर्दशपूर्व्वीव, तीर्थस्यास्य प्रवर्त्तकः। शक्रेणार्चिष्यतेऽभीक्ष्णं, लोकपालैश्च भक्तितः ॥६५२॥ हस्तद्वयोच्छ्रितं गात्रमायुर्विंशतिवत्सरी। तपश्च षष्ठमुत्कृष्टं, संघस्यास्य भविष्यति ॥६५३॥ दुष्षमांते स आचार्यो, विपद्याष्टमभक्तभृत्। सौधर्म्मे त्रिदशो भावी, विमाने सागराभिधे ॥६५४॥ च्युत्वा तस्मादसौ प्राप्य, भरतेऽत्र मनुष्यताम्। चारित्रं निरतीचारमाचर्य शिवमेष्यति ॥६५५॥ धर्म्मस्याद्ये यमे छेदस्तत्राचार्ये दिवंगते। राजधर्म्मस्य मध्याह्ने, पराह्णेऽग्नेर्भविष्यति ॥६५६॥ इत्युक्ता दुष्षमा वर्षसहस्राण्येकविंशतिः। श्रूयतां गौतमेदानीं, तावत्येवातिदुष्षमा ॥६५७॥ नष्टे धर्म्मादिके भावी, हाहाभूतो भयानकः। कालः षष्ठारके मातृपुत्रादिस्थितिवर्जितः ॥६५८॥ वास्यंति वायवोऽनिष्टाः, परुषाः पांशुवर्षिणः। दिवानिशं दिशो धूमायिष्यंते भीषणात्मिकाः ॥६५९॥ अतिशीतं शशी स्रक्ष्यत्यादित्याश्चातितप्स्यति। शीतवातातपक्रांतो, जनोऽतिक्लेशमाप्स्यति ॥६६०॥ वर्षिष्यंते तदाऽत्यर्थं, क्षाराम्लाख्या घनाघनाः। विषाग्निविद्युदाख्याश्च, स्वस्वनामानुसारि कम् ॥६६१॥ येन स्पृष्टेन पीतेन, जनानां भाविनो घनाः। शिरोऽर्त्तिश्वासशूलार्शःकासश्वासादयो गदाः ॥६६२॥ तृणगुल्मलतादीनां, भविष्यति ततः क्षयः। नृतिर्यंचो भविष्यंति, तथा सर्वेऽपि दुःखिताः ॥६६३॥ वैताढ्यर्षभकूटाद्री, गंगासिंधू च निम्नगे। मुक्त्वाऽन्यद् गिरिगर्त्तादि, भविष्यति समं समम् ॥६६४॥ भस्मरूपा तदा भूमिर्मुर्मुरांगारसन्निभा। कदाचित्कर्दमाकीर्णा, कदाचिद् वह्निदुर्ग्गमा ॥६६५॥ विद्यंते चोपवैताढ्यं, गंगासिंधोस्तटे तटे। बिलानि नव सर्वाणि, द्वियुक्ता सप्ततिस्ततः ॥६६६॥ तत्र स्थास्यंति ते मर्त्याः, कुवर्णाः कर्कशोक्तयः। क्रोधनाश्च कुसंस्थाना, एकहस्तसमुच्छ्रयाः ॥६६७॥ निर्वस्त्रा निस्त्रपाः क्रूरा, नरा नार्यश्च भाविनः। विंशत्यब्दी नृणामायुः, स्त्रीणां षोडशवत्सरी ॥६६८॥ तदाऽतिदुःखप्रसवा, षड्वर्षोदरिणी तथा। अनेकपुत्रपौत्रा स्त्री, वृद्धा षोडशवार्षिकी ॥६६९॥ मांसासिनो मनुष्यास्ते, निष्कृपा निर्विवेककाः।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

बीजमात्रं तु तिर्यंचस्तदा तत्रैव भाविनः ॥६७०॥ गंगासिंधुसरित्तोयं, तदा रथपथप्रमम् । प्रवक्ष्यति तथा मत्स्यनक्रचक्रकुला-
कुलम् ॥६७१॥ रात्रौ तत्रैत्य मत्स्यादीन्, कृष्ट्वा मोक्ष्यंति ते स्थले। दिवार्कतापपक्कांस्तान्, मोक्ष्यंते च निशांतरे ॥६७२॥ ते कृत्वे-
त्यघमेष्यंति, तिर्यक्षु नरकेषु च। षष्ठोऽरो भवितेत्यब्दसहस्राण्येकविंशतिम् ॥६७३॥ यादृशाववसर्प्पिण्यावंत्योपांत्याविमावरौ।
तावंतौ तादृशावुत्सर्प्पिण्यामाद्यद्वितीयकौ ॥६७४॥ तत्र प्रथमकारांते, पंचाप्येते घनाघनाः। सप्त सप्त दिनान्यत्र, वर्षिष्यंति पृथक्
पृथक्॥६७५॥ ते च पुष्करदुग्धाज्यपीयूषरसनामकाः। भूशैत्यधान्यसुस्नेहौषधीरसविधायिनः ॥६७६॥ द्रुमौषधिलतादीनि, निरीक्ष्य
बिलवासिनः। निर्यास्यंति बिलेभ्यस्ते, हृष्टा गुप्तिगृहादिव ॥६७७॥ वक्ष्यंतीतः परं मांसं, न भक्ष्यं यस्तु भक्षिता। स त्याज्यो-
ऽन्त्यजवच्चेति, करिष्यंति व्यवस्थितिम् ॥६७८॥ कालो यथा यथा गामी, वर्धिष्यंते तथा तथा। वपुःशक्तिसुखायूंषि, धनधान्या-
दिकानि च ॥६७९॥ यादृक्षे भरतेऽमुष्मिन्, कालस्तादृक्ष एव हि। अन्येषु भरतेष्वैरवतेष्वपि च सर्वदा ॥६८०॥ ततः कुलकराः
सप्त, दुष्षमांतेऽत्र भारते। भाविनो गौतमैतेषामाद्यो विमलवाहनः ॥६८१॥ द्वैतीयीकः सुदासाख्यस्तृतीयः संगमाभिधः।
तुर्यः सुपार्श्वनामा च, पंचमो दत्तनामकः॥६८२॥ षष्ठस्तु सुमुखाभिख्यः, संमुच्चिश्चेति सप्तमः। पूर्वोऽमीषां पुनर्भावी, जात-
जातिस्मृतिः स तु ॥६८३॥ संग्रहीष्यति हस्त्यादीन्, ग्रामादीन् रचयिष्यति। नीतिशिल्पकलादींश्च, प्रजानां दर्शयिष्यति ॥६८४॥
इत्युक्तं दुष्षमादीनां, स्वरूपं तव गौतम!। शलाकापुरुषानेवं, भाविनस्त्वधुना शृणु॥६८५॥ सप्ताब्दपंचमास्यां चतुरशीतौ च गौतम!।
वत्सराणां सहस्रेषु, गतेषु मम निर्वृतेः ॥६८६॥ उत्सर्प्पिण्यास्तृतीयारे, भविष्यंत्या गतेष्विह। सार्धेष्वष्टसु मासेषु, त्रिषु संवत्सरेषु
च ॥६८७॥ अत्रैव पुंड्रदेशेषु, शतद्वाराभिधे पुरे। संमुचेर्नृपतेः पत्नी, भद्रानाम्नी भविष्यति ॥६८८॥ तदा श्रेणिकराड्जीवो, भयात्

For Private and Personal Use Only

कूणिकभूपतेः। भुक्त्वा तालपुटं रत्नप्रभायामुदपादि यः ॥६८९॥ तत्राद्यप्रस्तटे सीमंतके च नरकेंद्रके। आयुश्चतुरशीत्यब्दसहस्राण्यतिवाह्य सः ॥६९०॥ तत्तत्प्रभावनाप्राप्तप्राज्यपुण्यप्रभावतः। विश्वं विश्वं समुद्धर्तुमिव दुर्गमदुर्गतेः ॥६९१॥ समुद्धृत्य ततो मासे, शुचौ पक्षे सिते तथा। निशीथसमये षष्ठ्यां, चंद्रे हस्तोत्तरागते ॥६९२॥ ज्ञानत्रयपवित्रात्मा, त्राता त्रिजगतामपि। देव्यास्तस्याः सुतत्वेन, कुक्षाववतरिष्यति ॥६९३॥ भद्रा प्रशस्तसंपूर्णदोहदा समये सुतम्। चैत्रशुद्धत्रयोदश्यां, निशीथे जनयिष्यति ॥६९४॥ विधिवद्दिक्कुमारीभिः, सूतिकर्म्मणि निर्मिते। जिनेंद्रं स्नपयिष्यंति, सुमेरौ सर्ववासवाः ॥६९५॥ पद्मगर्भसमांगस्य, तस्य जन्मोत्सवं पिता। विधायाधास्यते पद्मनाभ इत्यभिधां शुभाम् ॥६९६॥ निवेशयिष्यते राज्ये, पितृभ्यां सोऽष्टवार्षिकः। पूर्णभद्राभिधोऽन्येद्युर्माणिभद्राभिधस्तथा ॥६९७॥ महर्धिकौ सुरौ तस्य, सेनानीत्वं करिष्यतः। ततोऽस्य भावि नामान्यत्, देवसेन इति स्फुटम् ॥६९८॥ श्वेतवर्णश्चतुर्दंतो, विमलः शंखकुंदवत्। करिरत्नं महामानं, भविता चास्य वाहनम् ॥६९९॥ वक्ष्यतेऽसौ ततो लोकैर्नाम्ना विमलवाहनः। इति नामत्रयख्यातश्चिरं राज्यं करिष्यति ॥७००॥ दत्त्वाऽसौ वार्षिकं दानं, पित्रोर्गतवतोर्दिवम्। दशम्यां मार्गशीर्षस्य, कृष्णायां प्रव्रजिष्यति ॥७०१॥ विहृत्य सातिरेकां स, द्वादशाब्दीं प्रथमोऽर्हन्। राधशुद्धदशम्यां तु, लप्स्यते केवलश्रियम् ॥७०२॥ सप्रतिक्रमणं धर्म्ममचेलं पंचयामिकम्। यथाऽहं कथयामास, कथयिष्यत्यसौ तथा॥७०३॥ मया यथा महाराजा, अष्टौ प्रव्राजिताः किल। प्रव्राजिष्यति स तथा, पद्मनाभजिनोऽपि हि ॥७०४॥ स्वर्णरुक् सप्तहस्तोच्चस्त्रिंशद्वर्षाणि केवली। विहृत्य दर्शयामिन्यां, कार्त्तिके शिवमेष्यति ॥७०५॥ मत्तुल्योऽयं यथा भावी, वर्धमानादिना जिनः। पार्श्वादिसदृशोऽन्येऽपि, प्रतीपं भाविनस्तथा। ७०६॥ तेषां नामानि कथ्यंते, जीवाः पूर्वभवेषु च। तत्र जीवः सुपार्श्वस्य, सुरदेवो द्वितीयकः ॥७०७॥ तृतीयोऽर्हन्

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

सुपार्श्वाख्यो, जीवः पोट्टिलकस्य तु । तुर्यः स्वयंप्रभाभिख्यो, जीवो दृढायुषः पुनः ॥७०८॥ पंचमः कार्त्तिकजीवः, सर्वानुभूति-नामकः । जिनो देवश्रुतो नाम, जीवः शंखस्य षष्ठकः ॥७०९॥ उदयाख्यो जिनो भावी, नंदजीवस्तु सप्तमः। जीवः सुनंदसंज्ञस्याष्टमः पेढालनामकः ॥७१०॥ जिनेन्द्रः कैकशीजीवो, नवमः पोट्टिलः पुनः । जीवो रेवतिनाम्नस्तु, शतकीर्त्तिर्दशमोऽर्हन् ॥७११॥ जीवः सत्यकिसंज्ञस्यैकादशः सुव्रतो जिनः । कृष्णस्य शीरिणो जीवोऽममाख्यो द्वादशो जिनः॥७१२॥ बलदेवस्य जीवोऽर्हन्निष्क-षायस्त्रयोदशः। रोहिणीश्राविकाजीवो, निष्पुलाकश्चतुर्द्दश ॥७१३॥ निर्ममः सुलसायास्तु, जीवः पंचदशो जिनः। रेवतीश्राविकाजीवश्चित्रगुप्तस्तु षोडशः ॥७१४॥ जीवो गवालिनाम्नस्तु,समाधिः सप्तदशोऽर्हन् । जीवो गागलिसंज्ञस्याष्टादशः संवराभिधः॥७१५॥ जीवो द्वीपायनस्यैकोनविंशोऽर्हन् यशोधरः । जीवः कर्णस्य विंशस्तु, विजयाख्यो जिनेश्वरः ॥७१६॥ जीवस्तु नारदस्यैकविंशो मल्लाभिधो जिनः । अंबडस्य तु जीवोऽर्हन्, द्वाविंशो देवनामकः॥७१७॥ त्रयोविंशो जिनोऽनंतवीर्यो द्वारमदस्य तु । जीवः स्वातेः पुनर्जीवश्चतुर्विंशोऽत्र भद्रकृत् ॥७१८॥ चक्रिणोऽपि तथैवामी, दीर्घदंताभिधोऽग्रिमः । द्वितीयो गूढदंताख्यः, शुद्धदंतस्तृतीयकः ॥७१९॥ तुर्यः श्रीचंद्रनामा तु, श्रीभूतिरिति पंचमः । सोमाभिधानकः षष्ठः, सप्तमः पद्मनामकः ॥७२०॥ अष्टमस्तु महापद्मो, नवमो दर्शनाह्वयः । दशमो विमलश्चैकादशो विमलवाहनः ॥७२१॥ द्वादशोऽरिष्ठनामा तु, नवामी त्वर्धचक्रिणः। नंदिश्च नंदिमित्रश्च, तथा सुंदरबाहुकः ॥७२२॥ महाबाहुरतिबलो, महाबलो बलस्तथा । द्विपृष्ठश्च त्रिपृष्ठश्च, बलदेवास्त्वमी नव ॥७२३॥ बलश्च वैजयंतश्चाजितो धर्म्मश्च सुप्रभः । तथा सुदर्शनानंदौ ,नंदनः पद्म इत्यपि ॥७२४॥ तिलको लोहजंघश्च, वज्रजंघश्च केसरी । बलिः प्रह्लादनामा च, तथाऽपराजिताभिधः ॥७२५॥ भीमः सुग्रीवनामा च, नवामी प्रतिविष्णवः। शलाकापुरुषा एते,त्रिषष्टिरिति भाविनः

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

॥७२६॥ पृष्टमागामिकालादिस्वरूपं यत्त्वया किल । इंद्रभूते! तवाग्रे तद्, तन्मयेति प्ररूपितम् ॥७२७॥ श्रुत्वेति गौतमो वीरं, ववंदे प्रभुरप्यथ। कार्त्तिके दर्शयामिन्यां, जगाम पदमव्ययम् ॥७२८॥ इत्युच्चैर्जिनशासनोन्नतिगतं तीर्थेश्वरत्वं फलं, ज्ञात्वा श्रेणिकभूपतेरविरतस्याप्युत्तमं सर्वथा। भव्या! भक्तिभरावनम्रतनवः कुर्व्वीध्वमेनां मुदा, येन स्यादचिरेण वोऽपि सुलभा सर्व्वज्ञता निश्चितम् ॥७२९॥ ॥प्रभावनायां श्रेणिककथा ॥

इति श्रीअविच्छिन्नशासनस्वरूपतपोगच्छदिनमणिश्रीदेवेन्द्रसूरिसूत्रितं श्रीश्रेणिकचरित्रं ।

For Private and Personal Use Only